
॥ श्रीः ॥

भक्तिमीमांसा।



श्रीशाण्डिल्यऋषिप्रणीता

पदवाक्यप्रमाणपारावारीणमहामहोपाध्याय-

आचार्यस्वप्नेश्वरविरचितेन भाष्येण संयुता।

सेयम्

श्रीकृष्णदासात्मज गङ्गाविष्णु, खेमराजाभ्यां

मुम्बय्यां

स्वकीये

श्रीवेङ्कटेश्वरमुद्रायन्त्रे

अङ्किता।

शके १८०९ संवत् १९४४

☞ प्रसिद्धपत्र

सर्व जनो को विदित होवे कि हमारे श्रीवेंकटेश्वरछा पेखानेमे शाङ्करभाष्य और रत्नप्रभाटीका टिप्पणीसहित ब्रह्मसूत्र छपकर तयार है श्रीमहर्षि वेदव्यासप्रणीत होने से हमकोइसकी विशेष समालोचना करना कुछ आवश्यकनहीं हैं परंतु इतना लिखते है कि अद्यावधि पर्यंत ऐसे मोटे कागद और मोटे अक्षरोमें यहग्रंथ किसीने नहीं छापा इसग्रंथके अन्तमें निर्घण्टु और अधिक रणमालाभी संयुक्त करीगइ है और सर्व साधारणोंके सुवीतेके लिये मूल्यभी अति सुगम केवल १० रुपये डाकमासूलसहित रक्खा है

श्रीमद्भागवत श्रीधरीटीकासहित जिसके प्रथम १२ रुपये हे अब इसकी किंमत ८ रुपये हैं टपाल मासूल १॥ रुपया.

वाल्मीकि रामायण सटीक नवा छपेला किंमत १० रुपये टपाल महासूल १॥ रुपया.

सिद्धान्तकौमुदी मोटाअक्षर चिल्द बांधेला किंमत ४ रुपये टपाल मासूल माफहै.

और जिनकूं विशेष पुस्तक खरीद करना मंजूर होय उनको आधानाका टिकट भेजनेसे सूचिपत्र भेजदियाजायगा.

इसके लेनेवालेग्राहक गणोंको अपना नाम गाम जिला आदि स्पष्ट देवनागरीअक्षरोमें इसपत्तेपर लिखे।

श्रीयुत गंगाविष्णु श्रीकृष्णदास

"श्रीवेंकटेश्वर" छापखाना (मुंबई.)

शाण्डिल्यशतसूत्रीयं भाष्यम् ॥

परमेश्वरो जयति ॥

प्रणम्य परमं देवं श्रीस्वप्नेश्वरसूरिणा ।
शाण्डिल्यशतसूत्रीयं भाष्यमाभाष्यतेऽधुना ॥ १ ॥
गोविन्दचरणद्वन्द्वमधुनो महदद्भुतम् ।
यत्पायिनो न मुह्यन्ति मुह्यन्ति यदपायिनः ॥ २ ॥

जीवानां ब्रह्मभावापत्तिर्मुक्तिरिति वक्ष्यते जीवाश्च ब्रह्मणोऽत्यन्तमभिन्ना इति तेषां संसारस्त्रिगुणात्मकान्तःकरणोपाधिकृतो न साहजिकः स्फटिकस्यैव जपादिसन्निधिकृतं लौहित्यादिकं स चौपाधिकत्वादेव न ज्ञानेन निवर्तनीयः किन्तूपाध्युपधेययोरन्यतरहानेन तत्सम्बन्धहानेन वा नहि निपुणतरदर्शनेनाप्युपाधियोगे स्फटिकलौहित्यभ्रमनिवृत्तिरस्ति तथेहन सर्वसत्तास्फुरणात्मनो हानिः सम्भवति न वा सम्बन्धस्य तस्य तदुभयस्वरूपानतिरेकात् परिशेषादुपाधिहानादेव भ्रमनिवृत्तिर्नात्मज्ञानात् उपाधिहाने च कारणान्तरमन्वेष्टव्यं तं चेश्वरभक्तिरेवालौकिकत्वाच्छ्रुतिस्मृतिसिद्धा । तथा (गी० । अ० १४ । श्लो० ६) ।

तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥
रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥
तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥

इत्युपक्रम्य ।

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।

स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥

इत्युपसंहरन् भगवानेवात्मभक्तेस्त्रिगुणात्मकान्तःकरणलयपूर्वब्रह्मानन्दावाप्तिलक्षणमुक्तिहेतुतामाह। न चात्मज्ञानवैयर्थ्यम् अश्रद्धामलक्षालनेन भक्तावुपयोगात् नत्वपरोक्षान्तःकरणरूपोपाधिधर्माध्यासनिरासक्षमं ज्ञानम् अत एव (गी० । अ० १४ । श्लो० १९) गुणेभ्यश्चपरं वेत्ति मद्भावं सोऽधिगच्छतीति (गी० । अ० १४ श्लो० ४१) ज्ञानसञ्छिन्नसंशयामित्यादावयमर्थः स्फुट एव न् चाज्ञानकृतः संसारो येन ज्ञानान्निवृत्तिरपि वक्तुं शक्या प्रमाणाभावरत् रजतावयवादेः कारणस्याभावादज्ञातशुक्तित उत्पत्त्यसम्भवाच्च । अपि च (छान्दो०) 'कुतस्तु खलु सौम्यैवं स्यादसतः सज्जायेते'ति श्रुतिः कार्यसत्तया कारणसत्तां बोधयन्ती संसारस्य सत्यत्वमेवाह । नितराञ्च (छान्दो० ।) सत्यसंकल्प इत्यादिना परमेश्वरसर्गस्य । नापि भगवान् बादरायणः क्वचिदपि सूत्रे संसारस्याज्ञानकल्पितत्वमुक्तवान् प्रत्युत स्वप्नसृष्टिनिराकरणेन जाग्रत्सृष्टेः सत्यत्वम् । न च दृष्टान्तार्थं तत् मानाभावात्। सुखादिधर्माणां तु साहजिकत्वं नोपपद्यते सुखादयो न साक्षादात्मविकारा आत्मनि प्रतीयमानत्वाद्गौरत्वादिवत्। सुखाद्युपलब्धिः सकरणिका क्रियात्वादित्यत्र लाघवात् समवायेनैव करणजन्यत्वं युज्यते श्रोत्रजन्यत्वमिव शब्दस्य । सुखादयः करणसमवेताः अनादीन्द्रियग्राह्यगुणत्वात् शब्दवदिति परमते । उभयमते स्पर्शशून्येन्द्रियग्राह्यगुणत्वात् । आत्मसिद्धिस्तु सर्वसत्ताप्रकाशकतयेति सर्वमेतद्द्वितीये तृतीये स्फुटीभविष्यति । तस्मात् पुरुषार्थहेतुत्वाद्धर्मस्येव भक्तेर्मीमांसाविवित्सयेदं सूत्रम्।

अथातो भक्तिजिज्ञासा ॥ १ ॥

अथेत्यधिकारार्थो नानन्तर्यार्थः । आनन्तर्यं हि न स्वाध्यायाध्ययनस्य आनिन्ययोरन्यधिकृतेर्वक्ष्यमाणत्वात् । नापि शमादिसम्पत्त्यर्थः

मुमुक्षामात्रस्य भक्त्यधिकारत्वात्। यथा मन्त्रवर्णः (श्वेता०)।

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये॥ इति।

न च मङ्गलार्थोऽपि तदुच्चारणमात्रस्य मङ्गलत्वात्। तथा च मुमुक्षुणा भक्तिविचारः कर्तव्य इत्यर्थः। जिज्ञासया विचार आक्षिप्यते। यद्यपि परमेश्वरानुरक्तिरूपाया भक्तेर्न धर्मवत् कृतिसाध्यत्वं न वा ब्रह्मवज्ज्ञेयत्वं तथापि तस्याः स्वकारणपूर्वसुकृतैहिकगौणभक्त्यादिसंपन्नाया अपि नेयं भक्तिः नेयं निःश्रेयसार्था नेयमुत्तमविषयेत्यादिकुतर्कबलेन निवृत्तिरपि भवति यथा पत्यौ पत्न्याः। तन्निरासमुखेनैव तन्मीमांसाया भक्तावुपयोग इति अतःशब्देनोच्यते। यतः कुतर्कनिरासोऽपेक्षणीयः अतस्तज्जिज्ञासेति। अत एव, (विष्णुपु०। अंशे १। अ० २० श्लो० १६।

नाथ योनिसहस्रेषु येषुयेषु व्रजाम्यहम्।
तेषुतेष्वचला भक्तिरच्युतास्तु सदा त्वयीति॥

तदविच्युतिप्रार्थनमपेक्षितत्वादिति अत एव च फलवद्भक्त्यङ्गमपि विचारः फलवानेवेति॥ १॥

अथ तस्या लौकिकाकारतामन्तरेण बुद्ध्यनारोहान्न विचारविषयत्वमतस्तल्लक्षणमुच्यते।

सा परानुरक्तिरीश्वरे॥ २॥

अत्र सा परेति लक्ष्यनिर्देशः। शेषं लक्षणम्। परेति गौणीं व्यावर्तयति। ईश्वर इति प्रकृताभिप्रायम्। आराध्यविषयकरागत्वमेव सा। इह तु परमेश्वरविषयकान्तःकरणवृत्तिविशेष एव भक्तिस्तद्वैशेष्यं च लौकिकानुरागादौ सुग्रहम। यथोक्तं परभक्तिमता प्रह्लादेन। विष्णुपु०। अंशे १। अ० २०। श्लो० १७)।

या प्रीतिरविवेकानां विषयेष्वनपायिनी।

त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥

अत्र प्रीतिपदेन सुखनियतो राग एव लक्षितः अन्यथा प्रीतेः सुखरूपाया निर्विषयत्वेन विषयसप्तमी न स्यात् तस्याः सुखज्ञानरूपत्वेऽपि तज्ज्ञानस्य सुखविषयत्वाद्विषयविषयत्वासम्भवात्। तस्मादनुरक्तिरेव सविषयिणी लक्षिता। न च विषयजन्यप्रीतिरर्थः जनकसप्तम्या अननुशासनात्। किञ्च 'अच्युतास्तु सदा त्वयी'त्यत्र भक्तेरीश्वरविषयतासिद्धौ प्रीतिपदेनापि तदेकवाक्यतया सैवोच्यते। पूर्वं प्रतिजन्म भक्तिप्रार्थनमिह तु विषयरागदृष्टान्तेन तस्या एव सर्वथाप्यपरिहार्यत्वप्रार्थनमिति विशेषः। विषयजन्यप्रीतिरपि रागं विना न सम्भवतीति रागावश्यकत्वम्। तथा च पातञ्जलसूत्रम्। (पा.२।सू.७) 'सुखानुशयी राग' इति। तस्यैव वक्ष्यमाणलिङ्गेषु व्यापनाल्लाघवाच्च भक्तित्वम्। न तु क्वचित् स्मरणस्य। क्वचित् कीर्तनादेः। अननुगमात्। न च तज्ज्ञानस्य तत्त्वं द्वेषादिमत्स्वपि तत्प्रसङ्गात्। नाप्याराध्यत्वेन ज्ञानं सा पूजानमस्काराद्याराधनास्वननुगमात्। अपि च बलाद्भयाद्या नमस्कार्यत्वादिज्ञानवत्यपि भक्तोऽयमनुरक्तोऽयमिति व्यवहारापत्तेः अनुरागादिसहिताराध्यत्वज्ञानमिति चेत् अनुराग एवास्तु अत एव (गी.। अ.१०। श्लो.९।)

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ २ ॥

इत्यादौ तद्गतचित्तप्राणादीनां भजनमुक्तं नाराध्यत्वेन ज्ञानवतामेव। अत एव च कृष्णस्य कमनीयाकृतिदर्शनेनानुरक्तानां गोपतरुणीनामपि भक्तिफलं मुक्तिः स्मर्यते। अनुस्तु न लक्षणान्तर्गतः किन्तु भगवन्महिमादिज्ञानादनु पश्चाज्जायमानत्वादनुरक्तिरित्युक्तम्

ननु पित्रादिगोचरानुरागस्यापि प्रकृतभक्तित्वं प्रसज्येत जगत एव परमेश्वरात्मत्वात्। अथ विकाराविशिष्ट एव तथात्वं वाच्यं तथापि गोपीप्रभृतीनां प्रादुर्भावावच्छिन्नेश्वरभक्तावव्यापकम्। उच्यते जीवोपाध्यनवच्छिन्नचेतनविषयिणी अनुरक्तिरेव सेति। एवञ्च प्रादुर्भावावच्छिन्ने परिपूर्णे च रक्तिः संगृहीता भवति॥ २॥

तत्संस्थस्यामृतत्वोपदेशात्॥ ३॥

तस्मिन्नीश्वरे संस्था भक्तिर्यस्य स तथोक्तः। तस्यामृतत्वं फलमुपदिश्यते (छां०।) ब्रह्मसंस्थोऽमृतत्वमेतीति तस्मान्निष्फलत्वगौणफलत्वनिबन्धना तदजिज्ञासा परिहृता भवतीति॥ ३॥

ज्ञानमिति चेन्न द्विषतोऽपि ज्ञानस्य तदसंस्थितेः॥४॥

ननु ब्रह्मसंस्थाशब्देन ब्रह्मज्ञानमेवोच्यते न तु तद्भक्तिः। तथा चामृतत्वफलं तस्यैवेति चेद्ब्रूषे। नैष दोषः। संस्था भक्तिरेव न ज्ञानं द्विषतस्तज्ज्ञानवतोऽपि तत्संस्थत्वव्यवहाराभावात्। राजान्यनुरक्ताः स्वल्वमात्यमित्रादयस्तत्संस्था इति व्यपदिश्यन्ते न पुनः प्रतिपक्षभूपालाः। शब्दार्थनिर्णयो हि लोकवदेव वेदेऽपीति। अतएव चिरकालिकोपाख्याने [महाभार०। शा०। अ० २६७।

विमृश्यते न कालेन पत्नीसंस्थाव्यतिक्रमः।
सोऽब्रवीच्च भृशं तप्तो दुःखेनाश्रूणि वर्तयन्॥

इत्यनेन पतिभक्त्यतिक्रम उक्तः। तस्मात् संस्था भक्तिरिति। एवञ्च[ब्रह्मसू०। अ० १ पा० १ सू० ७] 'तन्निष्ठस्य मोक्षोपदेशा'दिति बादरायणीयसूत्रस्याप्ययमेवार्थोऽध्यवसेय इति॥ ४॥

तयोपक्षयाच्च॥ ५॥

तथा भक्त्या मुक्तिं प्रति ज्ञानमुपक्षीणं यस्माच्चकार उक्तयुक्तिसमुच्चयार्थः [गी०। अ० ७ श्लो० १२]।

देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि ।

इत्यादि तथा प्रह्लादं प्रति भगवद्वाक्यं । (विष्णुपु० । अंशे १ । अ० २० श्लो० २१)।

यथा ते निश्चलं चेतो मयि भक्तिसमन्वितम् ।
तथा त्वं मत्प्रसादेन निर्वाणमपि यास्यसि ॥

इति स्थितम् । ननु (श्वेताश्व० ।) तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेत्यत्र वेदनफलं मुक्तिः श्रुता तद्विरोधेन स्मृतीनामन्यार्थत्वं स्यादिति चेन्न अत्रापि तयैवोपक्षयात् । तथा हि अतिमृत्युपदं न मुक्तौ रूढं किन्तु यस्यां सत्यां मृत्योरतिक्रम इति व्युत्पत्त्या तदपेक्षया यतो भक्तेर्मृत्वतिक्रम इति व्युत्पाद्य भक्तिमेवातिमृत्युपदेनाभिधत्ताम् उपपदविभक्त्यर्थापेक्षया कारकविभक्त्यर्थस्य बलवत्त्वात् । (गी० । अ० १२ । श्लो० ७)।

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि न चिरात् पार्थ मय्यावेशितचेतसाम् ॥

इत्यादिना भक्तितो मृत्वतिक्रमप्राप्तेः । मन्त्रश्च भवति (तैत्तिरीयमन्त्रभागे) 'त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृता'दिति । अत्र यजनं भक्तिः तथैव तत्कल्पव्याख्यानात् । न चास्यां श्रुतौ भक्तेरसन्निधानं मुक्तावपि तुल्यत्वात् । तस्मादनपायिश्रुत्या ज्ञानस्योपक्षय एव प्रतीयत इति ॥ ५ ॥

ननु तथापि भक्तेः रागरूपत्वे किं कारणमित्यपेक्षायामाह ।

द्वेषप्रतिपक्षभावाद्रसशब्दाच्च रागः ॥ ६ ॥

भक्तिः खलु राग एव भवितुमर्हति कुतः द्वेषविरोधित्वात् । लोके हि द्वेष्यायं भक्तोऽयमिति मिथो विरुद्धधर्मवति व्यवह्रियते तत्र द्वेषविरोधी च राग एव प्रसिद्धो न ज्ञानादिः । एवं च वैष्णवे भगवति शिशुपालस्य द्वेषानुबन्धमभिधाय (विष्णुपु० अं० ४ अ० १५ गद्यम् १ ०)

'अयं हि भगवान् कीर्तितः संस्मृतश्च द्वेषानुबन्धेनापि अखिलसुरासुरदुर्लभं फलं प्रयच्छति किमुत सम्यग्भक्तिमतामि'त्युक्तम्। तथा चाग्निस्मृतौ।

विद्वेषादपि गोविन्दं दमघोषात्मजः स्मरन्।
शिशुपालो गतः स्वर्गं किं पुनस्तत्परायणः॥ इति।

तत्रापि द्वेषविरोधित्वेन भक्तेरभिधानात्। तथा च गीतासु [अ० १६ श्लो० १८)।

मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः।
तानहं द्विषतः क्रूरान् संसारेषु नराधमान्॥
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु।
आसुरीं योनिमापन्ना मूढा जन्मनिजन्मनि॥
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्। इति।

तद्विरोधिनी च भक्तिरीश्वरविषयैवानुरक्तिरिति युज्यते। किञ्च (तैत्ति०)। 'रसं ह्येवायं लब्ध्वानन्दीभवती'ति शब्दाद् ब्रह्मानन्दाविर्भावमुक्तेर्ब्रह्मगोचरस्य रसस्य हेतुतावगम्यते। रसश्च रागः (गी०। अ० २। श्लो० ५९)।

रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्त्तते।

इत्यादौ प्रसिद्धः। अत्र रसो विषयरागः। अत एव च रामलक्ष्मणादीनां स्वर्लोकारोहणमुक्त्वा (विष्णुपु०अं०४। अ० ४। गद्यम् ४।) 'येऽपि तेषु भगवदंशेष्वनुरागिणः कोशलनगरजानपदास्तेऽपि तन्मनसस्तत्सलोकतामापु'रिति साक्षादेव भक्तावनुरागशब्दः प्रयुक्त' इति। तस्मादपि न ज्ञानं किन्त्वनुरागरूपैव भक्तिर्निःश्रेयसफलेति। ननु द्वेषविरोधित्वं न रागत्वे लिङ्गम् उदासीनत्वेनानैकान्त्यादिति चेत्। उच्यते द्वेषकार्यं निवृत्तिस्तद्विरोधिनी प्रवृत्तिरिति। भवति च भक्तानां भजनीयानुवर्तनादौ प्रवृत्तिस्तद्विरोधिनां तदनुवर्त्तना

दो निवृत्तिः एवञ्च कार्यमुक्तेन विरोधिनिमित्तस्य द्वेषविप्रक्षेत्युक्तम् । तथा च प्रयोक्तव्यं भक्तिर्भजनीयगोचररागरूपा तदनुवर्तनादिहेतुहितसाधनताधीभिन्नात्मविशेषगुणत्वाद् यच्चैवं तच्चैवं यथा द्वेषः । रागोत्कर्षेण तदनुवर्तनाद्युत्कर्षस्य दृष्टत्वाच्च । किं च यो यस्मिन् भक्तस्तत्रतस्यौदासीन्याभावेऽगते भक्तिस्तादृशानुवर्तनाद्यनुकूलद्वेषविरोधिगुणरूपा अनुवर्तनहेत्वात्मविशेषगुणत्वाद्धितसाधनताधीवदिति हितसाधनताधीत्वबाधसहकारेण परिशेषाद्रागत्वसिद्धिः । किमुत भक्तिमतामित्येतत्कैमुतिकन्यायो विरोधिन्येव द्रष्टव्यः । (गी० । अ० ९ । श्लो० ३२ ।)

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।

किं पुनर्ब्राह्मणाः पुण्या इत्यादौ च । एवं (गी० । अ० १६ । श्लो० १८) मामात्मपरदेहेष्वित्यनेन द्वेषस्य संसारहेतुत्वात् तद्विरोधिगुणो जीवोपाधिपरिहारेण परात्मगोचरो राग एव भक्तिरूपःसंसारनाशहेतुः । एतदेवोक्तं मामप्राप्यैवेति । चकारात् पुलकादिरागलिङ्गेनापि रागत्वम् । प्रसिद्धं हि 'पुलकाञ्चितेन कथयति मय्यनुरागं कपोलेने'त्यादौ । भक्तेर्गुणान्तरत्वे तु पृथग्लिङ्गताकल्पने गौरवात् । स च रागः केषांचिदिष्टसाधनताज्ञानजन्योऽपि यागादिवदिच्छारूप एव । अस्माकं तु प्रीणाम्यनुरज्यामि नेच्छामीत्यादिप्रतीते रागः पृथगेव द्वेषवत् । इच्छाया असिद्धमात्रविषयत्वाद्रागस्य सिद्धासिद्धविषयत्वाच्च । प्रत्युत तस्यैच्छात्वादिव्याप्यत्वकल्पनागौरवाच्चेति दिक् । तस्मान्न तल्लक्षणासिद्धिरिति ॥ ६ ॥

ननु भक्तिः क्रियात्मिका सा च निःश्रेयसाय न क्षमते (तैत्ति० । आरण्य० । खिलप्रश्ने ऋक् २१) 'न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशु'रित्यादिश्रुतिभ्य इत्याशङ्कां परिहरन्नाह ।

न क्रिया कृत्यनपेक्षणाज्ज्ञानवत् ॥ ७ ॥

सा भक्तिर्न क्रियात्मिका भवितुमर्हति प्रयत्नानुविधानाभावात्। यन्न प्रयत्नानुविधायि तन्न क्रियात्मकं यथा ज्ञानम्। तद्धि प्रमाणसम्पत्त्यधीनं न पुरुषेण स्वेच्छया कर्त्तुमकर्त्तुमन्यथाकर्तुं शक्यते। तथा भक्तिरपि। नहि रागिणां प्रमदापुत्रादिविषयिणी पुंव्यापारेण तथा तथा भवति भक्तिः किन्तु पूर्वसुकृतमौणभक्त्यादिसाधनाधीनेति ॥ ७ ॥

अत एव फलानन्त्यम् ॥ ८ ॥

यतः सा न क्रियात्मिका अत एव तत्फलस्य निःश्रेयसस्यानन्तत्वमुपपद्यते। अन्यथा(छां०)'तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते' इत्यनेनामृतत्वस्यापि क्षयित्वं प्रसज्येतेति ८

तद्वतः प्रपत्तिशब्दाच्च न ज्ञानमितरप्रपत्तिवत् ॥ ९ ॥

भवति हि भगवद्वाक्यं (गी०। अ० ७। श्लो० १९)।

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥

इति ज्ञानवतः प्रपत्तिरुक्ता। भक्तेर्ज्ञानहेतुत्वे नेदमुपपद्यते इतरप्रपत्तिवदिति। यथा तदनन्तरं (गी०। अ० ७। श्लो० २०)।

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः।

इत्यनेन देवतान्तरप्रपत्तिनिन्दामुखेनैव प्रपत्तिः स्तूयते। तत्र देवताभक्तेरेव प्रपत्तिशब्देन कथनं न तज्ज्ञानस्य। तस्या एव प्रपत्तेरुभयत्र प्रत्यभिज्ञानात् इति। चकाराज्ज्ञानानन्तर्य्यश्रवणमपि ज्ञानत्वाभावे निदानम्। यथा (गी०। अ० १५। श्लो० १९)।

यो मामेवमसंमूढो जानाति पुरुषोत्तमम्।
स सर्वविद्भजति मां सर्वभावेन भारत ॥ इति।

तथा (गी०। अ० ९। श्लो० १३)।

भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः॥

इति च। तस्मान्न ज्ञानात्मिका। यद्यपि रागत्वेनैव ज्ञानभेदः सिद्धस्तथापि भक्तिशब्दो ब्रह्मज्ञाने गौण इति शङ्कानिरासार्थमेतत्। इदं तु चिन्त्यते भगवद्गीतावाक्यानि न शब्दविधया वेदवत् प्रमाणम्। किन्तु भारते स्मृतित्वेन। तथा च कथं शब्दादिति निर्देशः। अत्रैकेऽनुमितशब्दादिति व्याचक्षते। अत्रोच्यते अदृष्टार्थकभगवद्वाक्यत्वमेव वेदत्वं तच्च गीतास्वप्यविशिष्टम्। अत एव भगवद्गीतासूपनिषत्स्विति दृश्यते। केवलं त एव श्लोका व्यासेन निबद्धाः। तथा च पुराणान्तरम्।

गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता॥

न च शूद्राणामश्रवणप्रसङ्गः भारतश्रवणाभ्यनुज्ञानेनैव तदुपपत्तेः प्रणवादिस्तुत्यादिवत्। तद्विहायेति चेन्न लक्षताऽपरिपूर्त्तेः। तथा चोक्तमाचार्यैः

तानेव वैदिकान् मन्त्रान् भारतादिनिवेशितान्।
स्वाध्यायनियमं हित्वा लोकबुद्ध्या प्रयुञ्जते॥ इति॥ १॥

इत्याचार्यस्वप्नेश्वरविद्वद्विरचिते शाण्डिल्यशतसूत्रीयभाष्ये प्रथमाध्यायस्य प्रथममाह्निकम्॥ १॥

एवममृतत्वं प्रत्यनन्यथासिद्धायां भक्तौ लक्षितायां ज्ञानयोगभक्तीनामङ्गप्रधानभावविवेकाय द्वितीयाह्निकस्यारम्भः।

सा मुख्येतरापेक्षितत्वात्॥ १०॥

आह्निकसमाप्तावुक्तस्य पुनः स्मरणाय सेति निर्देशः। सा परा भक्तिर्मुख्या प्रधानम् इतरैरात्मज्ञानयोगादिभिः स्वोपकार्यतयापेक्षितत्वादित्यर्थः छान्दोग्ये 'यो वै भूमा तत्सुख'मित्यायुपक्रम्यान्नायते।

'आत्मैवेदं सर्व'मिति 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवती'ति तत्रात्मरतिरूपायाः परभक्तेः पश्यन्निति दर्शनमप्रियत्वादिभ्रमनिरासमुखेनाङ्गं भवति। यथा दण्डी प्रैषमन्वाह प्राचीनावीती दोहयति अभिजानन् जुहोति धनवान् सुखवानित्यादौ दण्डाद्यङ्गं तथा दर्शनमपि रतेरङ्गं मननविज्ञानयोरुक्तप्रदर्शनार्थतया 'न्यायप्राप्तयोरनुवादः'। एवमात्मक्रीडादेरतिनैयत्यादर्थप्राप्तोऽनुवाद एव अन्यथा रत्युद्देशेन दर्शनादिविधौ दर्शनाद्युद्देशेन वा रत्यादिविधौ वाक्यानि भिद्येरन्। तस्मात् (पूर्वमीमांसायाम्। अ० ३।पा० १। सू० २) 'शेषः परार्थत्वादि'त्न्यायाद्दर्शनमङ्ग'मिति। अत एव भगवान् मनुरपि। (महाभार०। शान्ति०। अ० १९४।)

यस्त्वात्मका प्राकृतं कर्म नित्यमात्मरतिर्मुनिः।
सर्वभूतात्मभूतात्मा स्याच्चेत् परतमा गतिः॥

इत्यनेनात्मरतेः प्राधान्यमाहेति॥ १०॥

प्रकरणाच्च॥ ११॥

प्रकरणं रतेरेव फलवत्त्वात् तस्यास्तत्प्रकरणस्थं दर्शनमङ्गं भवितुमर्हतीति॥ ११॥

दर्शनफलमिति चेन्न तेन व्यवधानात्॥ १२॥

अथ दर्शनस्यैव फलं स्वाराज्यलक्षणममृतत्वं तथा च तस्यैव प्रकरणमिति वैपरीत्यमिति चेन्न तेन तच्छब्देन व्यवधानात्। (छां०) 'स स्वराड् भवतीत्यत्र तच्छब्देन सन्निकृष्टात्मरतिमानेवोपस्थाप्यते न विप्रकृष्टः पश्यन्नि'ति व्यवहितोपस्थितौ कारणाभावात्। प्रकरणमेव कारणमिति चेन्न अन्योन्याश्रयात्॥ १२॥

दृष्टत्वाच्च॥ १३॥

दृष्टं हि लोके सौन्दर्यादिज्ञानस्य तरुण्यास्तरुणे रतिहेतुत्वं न तु र-

तेर्ज्ञानहेतुत्वमिति दृष्टोपकारत्वादप्यङ्गत्वमवसीयते। दृष्टं च प्रकृते-र्निष्करुणत्वाल्पमहिमत्वाप्रियत्वादिज्ञानं मनोमालिन्यकारणं भूतेषु करुणाबहुलाव्याहतैश्वर्यातिशयितरूपाश्रय आत्मेति ज्ञानान्मालिन्य-निवृत्तिस्ततः परा भक्तिरिति। अत एव गीयते(गी०।अ०५।श्लो०१७)

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः॥ इति।

तथा आयुर्वेदेऽपि (अष्टाङ्गहृदये। अ० १। श्लो० २३)।

धीर्धैर्यात्मादिविज्ञानं मनोदोषौषधं परम्। इति॥ १३॥

अत एव तदभावाद्बल्वीनाम्॥ १४॥

यत एव ज्ञानं दृष्टोपकारकमङ्गमत एव दृष्टोपकारं निरस्य मनोमा-लिन्यादिबाधात् प्रधानभगवदनुरागमात्रेण बल्वीनां मुक्तिः स्मर्यते। यथा (विष्णुपुराणे। अंशे ५। अ०१३। श्लो० १४। १५)।

तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया सती।
तदप्राप्तिमहादुःखविलीनाशेषपातका॥
चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम्।
निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका॥ इति।

अत्र सुखदुःखलिङ्गेनानुरागोऽनुमीयते न मुक्तिरिति वाक्यार्थः। द्वारबाधादनवहतकृष्णलेनापि कर्मणा फलसिद्धिरिव तासां रागान्मु-क्तिस्तदप्यवगम्यते ज्ञानमङ्गमेव प्रधानत्वे तु तदभावे फलं न स्यात् चिन्ता च न ब्रह्मात्मैक्यज्ञानं तत्कारणश्रवणमननाद्यसम्भवात्। कि-न्त्वनुरागनियतानुस्मृतिरेव। न चायमर्थवादः अपूर्वार्थत्वात् सन्निधौ विध्यभावाच्चेति॥ १४॥

भक्त्या जानातीति चेन्नाभिज्ञत्या साहाय्यात्॥१५

इदानीं श्रुतिविरोधेन प्रकरणस्थानलिङ्गबाधमाक्षिप्य समाधीयते यथा श्रुतं (गी०। अ० १८। श्लो० ५५)।

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ इति ॥

तत्र (तैत्तिरीयसं० । अ० १ । प्र० ५ । अनुवाकः ८) 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इतिवत् कारकश्रुत्या बलीयस्या भक्तेर्ज्ञानहेतुत्वमवसीयते। यद्यपि दृष्टत्वादित्यनेन दृष्टोपकारे प्रत्यक्षगम्ये न श्रुतेरवकाशः तथापि ब्रह्मविषयिण्या रतेर्ब्रह्मविषयज्ञानोपकार्यत्वं न प्रत्यक्षगम्यम्। किन्तु तरुण्यादे रतौ तथा दर्शनेन ब्रह्मगोचरायामप्यनुमातव्यम्। तथा च लिङ्गत्वे पर्यवसानादिति चेन्न दोषः।तथाहि यदि केवलं जानातीति वदेन्न त्वेवम्। किन्त्वभिजानातीति। अभिज्ञा पूर्वज्ञातज्ञानमुच्यते। तथा भक्त्युपकारिपूर्वज्ञानं तत्फलरूपभक्तिप्रवर्तकम्। अनन्तरं यावत् तद्दार्ढ्यं भक्त्यैवाभिज्ञामिभावेनापेक्ष्यते व्रीह्यवहननेनावघातवदिति। कार्यसाहाय्यार्थमुक्तं ततो ज्ञानदार्ढ्येन भक्तिदार्ढ्ये सति विशत इति। तस्मान्नेयं श्रुतिः किन्तु न्यायप्राप्तानुवाद इति। एतमेवार्थं स्फुटीकरोति ॥ १५ ॥

प्रागुक्तं च ॥ १६ ॥

भक्त्या मामित्यस्य पूर्वं ब्रह्मभूयाय कल्पत इत्यभिधाय (गी० अ० १८। श्लो० ५४)।

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥

इत्युक्तम्। तस्य तु ज्ञातब्रह्मणो ज्ञानप्रयोजनाभावाद् युक्तमनुवादत्वमिति ॥ १६ ॥

एतेन विकल्पोऽपि प्रत्युक्तः ॥ १७ ॥

एतेन ज्ञानस्याङ्गत्वनिर्णयेन ज्ञानभक्त्योरत्र विकल्पपक्षोऽपि प्रत्युक्तः निरस्त इति मन्तव्यम्। नह्यङ्गाङ्गिनोरेकत्र विकल्पो भवतीति अपिशब्दात् समुच्चयोऽपीति ॥ १७ ॥

देवभक्तिरितरस्मिन् साहचर्यात् ॥ १८ ॥

क्वचिदेवं श्रूयते (श्वेताश्व०।)

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ इति।

अत्र देवभक्तिरीश्वरेतरस्मिन् देवे मन्तव्या कुतः गुरुभक्तिसाहचर्यात्। साहचर्यं हि नामृतफलायां भक्तौ घटते। इन्द्रादिदेवतास्त्वाराधिताः शुभवज्ज्ञानफलाय भवन्तीति साहचर्यमपि निर्णायकम्। साहचर्यादुलूकशब्दवदुकयुक्तेरुपष्टम्भकमेतत् ॥ १८ ॥

योगस्तूभयार्थमपेक्षणात् प्रयाजवत् ॥ १९ ॥

योगः पुनर्ज्ञानार्थं भक्त्यर्थं च भवति। समाहितमनस्कताया उभाभ्यामपेक्षणात्। ननु [पूर्वमीमांसायाम्। अ० ३। पा० १। सू० २१] 'गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यादि'तिन्यायात् प्रधानाङ्गं योगः। कथमङ्गाङ्गमित्यत आह प्रयाजवदिति यथा प्रयाजो वाजपेयाद्यङ्गं तदीयदीक्षणीयादेरप्यङ्गं तद्वत्। तदङ्गताबोधकप्रमाणाविशेषात्। केवलं ज्ञानार्थं योगानुष्ठानप्रसङ्गेन भक्तिमुपकरोतीति। एवं विषयवैराग्यमपि उभयार्थं मन्तव्यम् ॥ १९ ॥

ननु [योगे। पा० १। सू० २३] 'ईश्वरप्रणिधानादि'ति पतञ्जलिस्मरणं दुरपह्नवं तत्र प्रणिधानाभिधेयस्य भगवद्भजनस्य समाधिसिद्ध्यर्थत्वमिति कथं भक्तेः प्राधान्यमित्यत आह।

गौण्या तु समाधिसिद्धिः ॥ २० ॥

तत्र प्रणिधानं गौणभक्तिरेव न प्रधानं तया समाधिसिद्धिरिति न स्मृतिविरोधोऽपीति। भवति च वाक्यशेषस्तत्रैव [योगे। पा० १। सू० २७।२८]'तस्य वाचकः प्रणवः। तज्जपस्तदर्थभावनमि'ति २०

हेया रागत्वादिति चेन्नोत्तमास्पदत्वात् सङ्गवत्॥ २१॥

योगशास्त्रप्रस्तावादिदं सूत्रम्। योगशास्त्रोक्तरागत्वाविशेषाद्भक्तिरपि मुमुक्षुणा हेयैव। तथा च सूत्रम् [यो० । पा० २।सू० ३] 'रागद्वेषाभिनिवेशाः क्लेशा' इति। एवञ्चेदुच्यते। नैवं वाच्यम्। उत्तमास्पदत्वाद्भक्तेः परमेश्वरविषयत्वादिति यावत्। नहि रागत्वमात्रेण हेयत्वं किन्तु संसारानुबन्धिरागत्वेनैव। यथा सङ्गत्वमात्रेण न त्याज्यता किन्तु असत्सङ्गत्वेन तद्वत्। तथा चेश्वरभक्तिर्हेया रागत्वादित्यत्र संसारानुबन्धित्वं मोक्षाननुगुणत्वं चोपाधिः। न चासात्त्विकी सा [गी० । अ० १७। श्लो० ४] यजन्ते सात्त्विका देवानित्यादिना सात्त्विकत्वकीर्त्तनादिति॥ २१॥

तदेव कर्मिज्ञानियोगिभ्य आधिक्यशब्दात्॥ २२॥

तदेव भजनं मुख्यं तस्या भक्तेर्वा मुख्यत्वम्। एतत् सर्वथैव निश्चितं यस्मादेवं शब्द्यते [गी० । अ० ६। श्लो० । ४६ । ४७]।

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥
योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः॥ इति।

अत्र विशेषणानां तपआदीनामाधिक्यनिबन्धनं विशेष्याणामाधिक्यं क्रमादिति मन्तव्यम्। न खल्वङ्गस्य मुख्यादाधिक्यमुपपद्यते तस्माद्भक्तिः प्रधानमिति॥ २२॥

श्रुत्यर्थेनापि तदुत्पत्तिपरिहारार्थं पठति।

प्रश्ननिरूपणाभ्यामाधिक्यसिद्धेः॥ २३॥

अत्र कृत्स्नोऽपि द्वादशाध्याय उदाहरणम् (गी० । अ० १२। श्लो० १-७)।

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते।

ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १ ॥ इति प्रश्नः।

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥
ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ ३ ॥
सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ ४ ॥
क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५ ॥
ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ ६ ॥
तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात्।
भवामि न चिरात् पार्थ मय्यावेशितचेतसाम् ॥ ७ ॥

इति निरूपणम्। ताभ्यां भक्तेः प्राधान्यसिद्धेः नार्थवादत्वमायाति। प्रश्ननिरूपणं हि निर्णयार्थं प्रसिद्धं न स्तुत्यर्थमिति। केवलाङ्गानुष्ठानेन क्लेशाधिक्यमेवेति ॥ २३ ॥

श्रद्धाप्रसङ्गाद्भक्तेः श्रद्धारूपत्वशङ्कापिशाचीं निराकरोति।

नैव श्रद्धा तु साधारण्यात् ॥ २४ ॥

भक्तिर्न सर्वथा श्रद्धात्वेन शङ्कनीया श्रद्धायाः कर्ममात्राङ्गत्वात्। न चैवमीश्वरभक्तिरिति ॥ २४ ॥

तस्यां तत्त्वे चानवस्थानात् ॥ २५ ॥

(गी०। अ० ६। श्लो० ४७)।

श्रद्धावान् भजते यो मां स मे युक्ततमो मतः।

इति हि श्रुतम्। तत्र भक्तौ श्रद्धारूपायां श्रद्धाङ्गत्वे प्रतीतेऽनवस्थाप्रसङ्गात् श्रद्धाया अनङ्गत्वात्। अन्यथा तस्यामपि श्रद्धान्तरमि-

त्यनवस्थैव। तस्मादारम्भणीयारम्भे आरम्भणीयवदाचमने चाचमनवऋतौ श्रद्धा नाङ्गं स्यात्। श्रद्धाभक्तिसमन्वित इति भेदेन कथनाच्च।२५।

ब्रह्मकाण्डं तु भक्तौ तस्यानुज्ञानाय सामान्यात् ॥ २६॥

ज्ञानाप्राधान्ये ज्ञानकाण्डमित्युत्तरकाण्डप्रसिद्धिर्न स्यादिति मन्वानं प्रत्युच्यते। भक्त्यर्थं ब्रह्मकाण्डं श्रूयते न ज्ञानार्थम्। अज्ञातार्थज्ञापनस्य काण्डद्वयसामर्थ्यात्। अन्यथा धर्मज्ञानार्थं पूर्वकाण्डान्नातमपि ज्ञानकाण्डं स्यात्। नच ज्ञानविधिः सम्भवति येन तत्प्राधान्यादपि ज्ञानकाण्डं भवेदिति। तस्माज् ज्ञानकाण्डमिति भ्रमः। किन्तु ब्रह्मकाण्डमेव। अतएव (ब्रह्मसू०। पा० १। सू० १) 'अथातो ब्रह्मजिज्ञासा' इति सूत्रितम्। तत्तु भक्त्यर्थत्वाद्भक्तिकाण्डमपीति॥ २६॥

इत्याचार्यस्वप्नेश्वरविद्वद्वरविरचिते शाण्डिल्यशतसूत्रीये भाष्ये प्रथमाध्यायस्य द्वितीयमाह्निकम्॥ २॥

समाप्तश्च प्रथमोऽध्यायः॥ १॥

तस्या भक्तेः साक्षात् प्रयत्ननिष्पाद्यत्वेन निष्पत्त्यर्थं साधनान्तरापेक्षा तत्रान्तरङ्गसाधनं ज्ञानं बहिरङ्गसाधनान्यपरभक्तिप्रभृतीनि तेषां विवेकाय द्वितीयाध्यायारम्भः।

बुद्धिहेतुप्रवृत्तिराविशुद्धेरवघातवत् ॥ २७॥

बुद्धिर्ब्रह्मप्रमितिः सा यद्यपि कृत्यनिष्पाद्या तथापि तद्धेतूनां श्रवणमननिदिध्यासनादीनां तन्निष्पत्तयेऽनुष्ठानमावश्यकम्। तत्किं सकृत् कृते कृतःशास्त्रार्थ इति न्यायात् सकृत् प्रवर्त्तते उत यावद्भक्तिदार्ढ्यम। तत्रोच्यते भक्तिपरिशुद्धिपर्यन्तं तत्प्रवृत्तिरावश्यकी यथा व्रीहीनवहन्तीत्यनेन विहितव्रीह्यवघातस्य यावद्वैतुष्यमनुष्ठानं शास्त्रार्थः तथा दृष्टोपकारकत्वान्मनोमालिन्यनिरासपर्यन्तं ज्ञानायनुष्ठाने यतनीयमिति॥ २७॥

तेषामङ्गिनां यान्यङ्गानि तदनुष्ठानं तु न प्रसज्यत इत्यत्रोत्तरम्।

तदङ्गानां च ॥ २८ ॥

तदङ्गानां गुर्वनुगमनवेदाविरोधितर्कानुसन्धानशमादीनामप्यनुष्ठानं युक्तम्। नह्यङ्गविकलान्यङ्गानि सैन्यसेनापतिवत् प्रधानोपकाराय क्षमन्ते ॥ २८ ॥

इदानीं बुद्धिविषयपरिशुद्धिश्चिन्त्यते।

तामैश्वर्यपरां काश्यपः परत्वात् ॥ २९ ॥

तां बुद्धिं परमेश्वरैश्वर्यादिमद्विषयिणीं निःश्रेयसफलां काश्यप आचार्यो मन्यते कुतः जीवात्मभ्यः परत्वात् तैः स्वज्ञानाय परज्ञानस्यापेक्षितत्वात्। एतन्मते जीवब्रह्मणोरत्यन्तं भेद इति ॥ २९ ॥

आत्मैकपरां बादरायणः ॥ ३० ॥

बादरायण आचार्यः पुनः शुद्धात्मविषयिणीमेव मनुते तथा च सूत्रं [ब्रह्मसू०। अ०४। पा०१। सू०३] 'आत्मेति त्ववगच्छन्ति ग्राहयन्ति चे'ति। एतन्मते जीवब्रह्मत्वकल्पनाया मिथ्यात्वाच्छुद्धचिदात्ममात्रबुद्धेस्तत्त्वज्ञानत्वात् तदेव मुक्तिफलायेति ॥ ३० ॥

उभयपरां शाण्डिल्यः शब्दोपपत्तिभ्याम् ॥ ३१ ॥

शाण्डिल्य आचार्यस्तूभयपरामेव मन्यते कुतः शब्दो हि वेदस्तथा ब्रूते [छां०।] 'सर्वं खल्विदं ब्रह्म तज्जलानीति शान्त उपासीत' इत्युपक्रम्य 'एष म आत्मान्तर्हृदयमेतद्ब्रह्मैतमितः प्रेत्याभिसम्भवितास्मीति यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्यः शाण्डिल्य' इति विचिकित्स्य तदुभयविषयविदो ब्रह्माभिप्रायलक्षणप्रेमभक्तिजन्यब्रह्मसम्भवफलत्वमाह। [तैत्तिरीयसं०।अ०७।प्र०१। अनु०१०। मं०२] 'बबरः प्रावाहणिरकामयते'तिवत् पूर्वशाण्डिल्यार्थत्वान्न नित्यानित्यसंयोगविरोधः। वस्तुतो वेदस्य भगवत्कर्तृकत्व-

मेव। श्रुतेरपि (तैत्तिरीयारण्यके। प्र० ३। अनु०११। दशकं४)।

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥ इति।

उपपत्तिश्च भवति ब्रह्म खलु परमैश्वर्यवत्तया श्रुतं जीवस्वरूपतया च तथा च श्रुतिः [तैत्तिरीयोप०।पृ०१२३]'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्तीति तद्विजिज्ञासस्व'। तथा [गी०। अ०१५। श्लो०७]।

ममैवांशो जीवलोके जीवभूतः सनातन इति।

तत्र किं कस्योपमर्दकम्। तस्मात् (छां०।) 'तत्त्वमस्या'दिवाक्येनोभयबोधनमेवोपपत्तिमदिति॥ ३१॥

वैषम्यादसिद्धमिति चेन्नाभिज्ञानवदवैशिष्ट्यात्॥३२॥

ननूभयविषयत्वमेव न सिद्ध्यति वैषम्यात्। विषमं हि जगत्कर्तृत्वादिविशिष्टे तदकर्तृत्वादिविशिष्टज्ञानमिति चेन्न यतः सोऽयं देवदत्तः सोऽहमिति प्रत्यभिज्ञावदेकविशिष्टेऽपरवैशिष्ट्यमन्तरेण सामानाधिकरण्यस्य स्वरूपाभेदांशगोचरकत्वेन तदुपपत्तेः। विशिष्टवैशिष्ट्यबुद्धेरौत्सर्गिकत्वात्। अथ विशेष्यमात्रलक्षणया स्वरूपाभेदोपस्थितिरिति मतं तन्न लक्षणया बोधस्य जघन्यत्वात् लक्ष्योपस्थितौ तदवच्छेदकोपस्थितिहेतुसत्त्वाच्च। अन्यथा कदाचिच्छक्यतावच्छेदकमन्तरेणापि शक्यस्मृतिर्भवेत् इत्यास्तां तावत्॥ ३२॥

न च क्लिष्टः परः स्यादनन्तरं विशेषात्॥ ३३॥

नचैवं सति जीवोपाधिक्लेशादिमत्त्वमपि परमेश्वरे प्रसज्येतेति वक्तुं शक्यम्। उक्ताभेदबुद्ध्यनन्तरं क्लेशादेरात्मासम्बन्धित्वरूपविशेषनिर्णयादिति॥ ३३॥

ऐश्वर्यं तथेति चेन्न स्वाभाव्यात्॥३४॥

नन्वेदं क्लेशादिवदैश्वर्यं कर्तृत्वादिलक्षणं परमेश्वरस्य बाध्यते वैभवं

स्वात्मनि प्रतीतत्वान्न क्लेशादिवदिति चेन्न कर्तृत्वादेः परमेश्वरस्य स्वाभाव्यात्। नहि वह्नेरुष्णस्वाभाव्यमन्यथा भवति। तस्मादस्वाभाविकत्वमुपाधिरिति। अत एव दर्पणादिप्रतिफलितबिम्बे भास्वति मालिन्यादिबाधेऽपि वृत्तिप्राकाश्यादिस्वभावस्याबाध एवेति॥ ३४॥

ननु परमेश्वरस्य सत्यमैश्वर्यं जीवानां तु कथमागन्तुकः क्लेशादिरित्यत्र हेतुमाह।

अप्रतिषिद्धं परैश्वर्यं तद्भावाच्च नैवमितरेषाम्॥ ३५॥

नहि कस्यामपि श्रुतौ परमेश्वरस्यैश्वर्यं प्रतिषिद्धमस्ति येन प्रतिपन्नमपि बाधितं स्यात्। प्रत्युत (छां०।) सत्यसङ्कल्प इत्यादिना तस्य स्वाभाव्यमवगम्यते। नच जीवस्येव प्रतीतधर्मत्यागे कारणमस्ति सदैश्वरत्वात् सदैव मुक्तत्वात्। तदितरेषां तु जीवानां नैवं स्वाभाविकः क्लेशादिः कस्मात् तद्भावात्। श्रूयते हि [छां०] 'परं ज्योतिरुपसम्पद्यते स्वेन रूपेणाभिनिष्पद्यते' इत्यादिभिः तच्च स्वभावत्वे नोपपद्यते। उपपद्येतापि यदि परस्य क्लेशादिस्वभावः स्यात्। न चैवं तस्माद्ब्रह्मभावलक्षणमुक्त्यन्यथानुपपत्त्यापि जीवानामौपाधिकी संसृतिरिति। यद्यपि परस्यापि मायौपाधिकमैश्वर्यं तथापि तदुपाधेः कदाचिदपि नात्यन्तलयः। जीवोपाधिबुद्धीनां तु परभक्तौ सत्यामत्यन्तलय एव। नहि भगवतो माया शक्तिः क्षीयते जीवानामनन्तत्वेन तत्संसारतद्भजनाद्यर्थं भगवतः प्रवृत्तेरावश्यकत्वादिति। एवञ्च (बृहदार०)। 'ध्यायतीव लोलायतीवे'त्यादिश्रुतिः 'अथातआदेशो नेति नेती'त्यादिश्रुतिश्च जीवविषयिण्येवेति॥ ३५॥

सर्वानृते किमिति चेन्नैवम्बुद्ध्यानन्त्यात्॥ ३६॥

अथ क्रमशो मुक्तावपि यदा सर्वबुद्धीनां विलयस्तदा परोपाधेः स्थितौ प्रयोजनाभावात् तस्याप्यत्यन्तलये किं कृतमैश्वर्यं स्वभाव इति चेन्नैवं भवति। जीवोपाधिबुद्धीनामनन्तत्वात् तादृशकाल एव

नास्तीति युक्तं स्वाभाविकमैश्वर्यम् । नच प्रागभावाः प्रतियोगिजनकास्तच्चादित्येतावतापि कालस्तथाभूतः सिद्ध्यति । अथैकदा सर्वे जनितप्रतियोगिन इति चेन्न अप्रयोजकत्वात् । सर्वकार्यशून्यकालानुमानं त्वत्यन्ततर्कशून्यम् । अन्यथा सर्वे प्रागभावाः कदाचिदजनितप्रतियोगिन इत्यनुमानेन ध्वंसानधिकरणः प्राक्कालः सिध्येत् । अथाहमेवामुक्तः स्यामिति धिया मुक्तावयत्नप्रसङ्ग इति चेत् फलानिश्चयेऽप्युपायतानिश्चयेन तत्साधने प्रवृत्तिरस्तु । प्रत्युत सर्वमुक्तिनिश्चये तत एवाप्रवृत्तिप्रसङ्ग इति ॥ ३६ ॥

अथोपादानकर्तृत्वलक्षणमैश्वर्यं यदि परस्य साहजिकं तदा विकारित्वमेव प्राप्तं मृदादिवदित्यत उच्यते ।

प्रकृत्यन्तरालादवैकार्यं चित्सत्त्वेनानुवर्तमानात् ॥ ३७॥

प्रकृतिर्नाम जडकार्यमात्रोपादानम् । सा विकार्या ननु ब्रह्मस्फुरणरूपसत्तया प्रकृत्यनुगतत्वेन च परस्य कर्तृत्वादि । नच प्रकृतिरेव सत्तेति वक्तुं शक्यते जीवानामसत्त्वप्रसङ्गात् । तेषां प्रकृतेः परत्वात् । तस्मात् प्रकृतिलक्षणां मायाशक्तिमन्तरालीकृत्य परस्य कर्तृत्वादिस्वाभाव्यमिति न विकार्यता नहि मायया सृजन्मायावी मायाकार्यो भवतीति । यद्यपि तादात्म्येन कार्यत्वमेव विकार्यत्वं तच्च वर्त्तत एव तथापि क्षीरादिवन्न स्वरूपपरिवर्त्तनेन विकारित्वम् । यद्वा स्वाधिकविकाराहेतुत्वेन घटं प्रति दण्डादिवदविकार्यत्वमस्ति । तदेवोक्तं प्रकृत्यन्तरालादिति ॥ ३७ ॥

ननु मायोपादानत्वे मायायामेव जगत् प्रतिष्ठितं तर्हि कथं (तैत्तिरीयखिलोपनि० । खं० २६) 'तस्मिन् सर्वं प्रतिष्ठित'मिति श्रुत्या जगतो ब्रह्मप्रतिष्ठा प्रतिपाद्यत इत्यत्रोत्तरम् ।

तत्प्रतिष्ठा गृहपीठवत् ॥ ३८ ॥

तस्मिन् ब्रह्मण्यपि विकारप्रतिष्ठानमविरुद्धं गृहपीठवत् । यथा

गृहमध्यस्थपीठे स्थितोऽपि गृहे तिष्ठति पीठे तिष्ठतीति व्यपदिश्यते तद्वत्॥ ३८॥

ननु तर्हि प्रकृत्यैव ब्रह्मान्यथासिद्धमस्तु नेत्युच्यते।

मिथोऽपेक्षणादुभयम्॥ ३९॥

ब्रह्म प्रकृतिश्चोभयमपि कारणम्। परस्परं चेतनाचेतनाभ्यां स्वज्ञानाय स्वशक्तिविषयाय चाऽपेक्षितत्वात् किं कस्यापेक्षकमिति॥३९॥

इदानीं स्वशास्त्रे व्यवहारलाघवाय पदार्थसङ्कलनमुच्यते।

चेत्याचितोर्न तृतीयम्॥ ४०॥

चेत्या प्रकृतिः चिद् ब्रह्म तयोर्न तृतीयमर्थान्तरमत्रेत्यर्थः। ननु न तृतीयस्य सिद्ध्यसिद्धिभ्यां चोद्यत इति चेत्। अयमर्थः ब्रह्मभिन्ने ज्ञातृत्वं प्रकृतिभिन्ने च ज्ञेयत्वं निषिध्यत इति॥ ४०॥

अथ प्रकृतिपुरुषयोरसम्बन्धे सर्वकार्यविलोपः। सम्बन्धे तु स एव तृतीय इत्यत आह।

युक्तौ च सम्परायात्॥ ४१॥

मिथ इत्यनुवर्त्तते। तौ प्रकृतिपुरुषौ बुद्धिस्थौ परस्परं प्रतिसम्बन्धरूपौ न त्वागन्तुकः कश्चित् कस्मात् सम्परायात् अनादित्वादेव। तथा च गीतायाम् (अ०। ३। श्लो० १९) 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपी'ति। अथानादिरेव सम्बन्धान्तरमस्त्विति चेन्न जडाजडविकल्पेन तयोरनन्यत्वादिति॥ ४१॥

ननु प्रकृतिर्मिथ्यैव मायारूपत्वात् तस्याः (श्वेताश्व०)।

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।

इत्यादिश्रुतिभ्यः। तथा च कथं वेद्यं पदार्थ इत्यत आह।

शक्तित्वान्नानृतं वेद्यम्॥ ४२॥

वेद्यं प्रधानं नानृतं न मिथ्या भवितुमर्हति कुतः शक्तित्वादेव।

नहि मायावी मायाशक्तिं विना विहितागन्तुकसृष्टये प्रभवति। किञ्च (छां०।) 'कुतस्तु खलु सौम्यैवं स्यादसतः सज्जायेते'ति श्रुतिः कार्यसत्त्वेन कारणसत्तां वदन्ती सर्वसत्तामाह नानृतत्वम्। अस्ति तु सर्वदा भागवती सृष्टिः सादृश्यसहकार्यपेक्षा चेतनकृतसृष्टित्वान्मायिकसृष्टिवदिति। न चादृष्टादिभिरर्थान्तरम् एकशक्त्यपेक्षायां लाघवाद्भोगतत्साधनेतरेषु अदृष्टहेतुतायां मानाभावात्। एवं सर्वकार्येषु मिथो व्यभिचारादेकनित्यसहकारिशक्तिसिद्धिः। तदवान्तरानेककल्पनं तु फलमुखमिति न गौरवायेति। विस्तरोऽस्यैव तृतीये इति ॥ ४२ ॥

गता प्रासङ्गिकी चर्चा प्रकृतमनुसरति।

तत्परिशुद्धिश्च गम्या लोकवल्लिङ्गेभ्यः॥ ४३ ॥

यद्यपि जानामीच्छामीत्यादिवदहं भजे अनुरज्ये इत्येवमादिना प्रत्यक्षगम्यैव भक्तिस्तथापि तस्या दृढतरसंस्कारवैशिष्ट्यलक्षणा परिशुद्धिर्न प्रत्यक्षतो निर्णेतुं शक्यते ज्ञानप्रामाण्यवत्। तस्मात् तन्निर्णयो लोकवज्जातलिङ्गेभ्य एव। यथा लोकेऽनुरागतारतम्यं तत्कथादावश्रुपुलकादिविकारैरनुमीयते तद्वदिति ॥ ४३ ॥

न केवलं लोकवल्लिङ्गानि भवन्ति महर्षीणां स्मृतिभ्योऽपि तानि लिङ्गानि बाहुल्येन लक्ष्यन्त इत्याह।

सम्मानबहुमानप्रीतिविरहेतरविचिकित्सामहिमख्यातितदर्थप्राणस्थानतदीयतासर्वतद्भावाप्रातिकूल्यादीनि च स्मरणेभ्यो बाहुल्यात्॥ ४४ ॥

यथार्जुनस्य सम्मानम्।

प्रत्युत्थानं तु कृष्णस्य सर्वावस्थो धनञ्जयः।
न लङ्घयति धर्मात्मा भक्त्या प्रेम्णा च सर्वदा ॥

बहुमानं यथा इक्ष्वाकोः। [नृसिंहपु०। अ०२५। श्लो०२२]

पक्षपातेन तन्नास्ति मृगे पद्मे च तादृशि।
बभार मेघे तद्वर्णे बहुमानमिति नृपः॥

प्रीतिर्यथा विदुरस्य। [महाभारते। उद्यो०। अ०८८।]

या प्रीतिः पुण्डरीकाक्ष तवागमनकारणात्।
सा किमाख्यायते तुभ्यमन्तरात्मासि देहिनाम्॥

विरहो यथा गोपीनाम् [विष्णुपु०। अंशे५। अ०१८।श्लो०१७]

गुरूणामग्रतो वक्तुं किं ब्रवीमि न नः क्षमम्।
गुरवः किं करिष्यन्ति दग्धानां विरहाग्निना॥

इतरविचिकित्सा यथा श्वेतद्वीपनिवासिनाम्। नारददर्शनेऽपि विघ्नबुद्धिः यथा चोपमन्योः। (महाभारते। अनुशा०। अ० १४।

अपि कीटः पतङ्गो वा भवेयं शङ्करज्ञया।
ननु शक्र त्वया दत्तं त्रैलोक्यमपि कामये॥

महिमवृद्धौ यथा यमस्य। (नृसिंहपु० अ०८। श्लो० २१)

नरके पच्यमानस्तु यमेन परिभाषितः।
किं त्वया नार्चितो देवः केशवः क्लेशनाशनः॥

(विष्णुपु०। अंशे३। अ० ७। श्लो० १०)।

स्वपुरुषमभिवीक्ष्य पाशहस्तम्।
वदति यमः किल तस्य कर्णमूले॥
परिहर मधुसूदनप्रपन्नान्।
प्रभुरहमन्यनृणां न वैष्णवानाम्॥ ७॥

तदर्थप्राणस्थितिर्यथा हनूमतः तेनैवोक्तम्। (वाल्मीकीये। उत्तरकाण्डे। स० १०७। श्लो० ३१॥)।

यावत् तव कथा लोके विचरिष्यति पावनी।
तावत् स्थास्यामि मेदिन्यां तवाज्ञामनुपालयन्॥८॥

अथ वा कृत्यकृत्यानामपि नारदादीनां तदेकाराधनार्थं प्राण्यधार-

णम्। अत एष श्रुतिः। (नृसिंहतापिनी। खं०६) 'यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्चे'ति ॥ ९ ॥

तदीयताभावस्तु वसोरुपरिचरस्य (महाभारते। शा०।अ०३३७।)

आत्मराज्यं धनं चैव कलत्रं वाहनं तथा।
एतद्भागवतं सर्वमिति तत् प्रेक्षते सदा ॥ १० ॥ इति।

सर्वभूतेषु तद्भावो यथा प्रह्लादस्य प्रसिद्धः। उक्तश्च तेनैव। (विष्णुपु०। अंशे१। अ०१९। श्लो०५)

एवं सर्वेषु भूतेषु भक्तिरव्यभिचारिणी।
कर्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयं हरिम् ॥ ११ ॥

तस्मिन्नप्रातिकूल्यं यथा हन्तुमागतेऽपि भगवति भीष्मस्य। तेनैवोक्तम्। (महाभारते। भीष्मप०।अ०५८।)

एह्येहि देवेश जगन्निवास।
नमोऽस्तु ते शार्ङ्गगदासिपाणे ॥
प्रसह्य मां पातय लोकनाथ।
रथादुदग्राद्भुतशौर्यसंख्ये ॥ १२ ॥

आदिशब्दादुद्धवाक्रूरादिचेष्टितान्यपि द्रष्टव्यानि। यद्यपि द्वेषविपक्षभावादित्यत्रेदमुक्तं तथापि तत्र रागलिङ्गत्वेनात्र च बहुभक्तिपरिशुद्धिलिङ्गतयेति विशेष इति ॥ ४४ ॥

ननु स्वामिन्यनुरागिणां तदनुग्रहतारतम्यवत्सु द्वेषेर्ष्यादयो भवन्ति तेऽपि किं लिङ्गानि नेत्याह।

द्वेषादयस्तु नैवम् ॥ ४५ ॥

तदसमञ्जसभावादेव। यथोक्तं भगवता द्वैपायनेन। (महाभारते। अनुशा०।अ०१४९।)

न क्रोधो नच मात्सर्यं न लोभो नाशुभा मतिः।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥ इति।

शिशुपालस्य तु द्वेषात् स्मरणं ततः परा भक्तिस्ततो मुक्तिरित्येव क्रम इति ॥ ४५ ॥

अथ प्रायशो भगवदवतारविषयाण्येव तानि लिङ्गानि स्मर्यन्ते ब्रह्मज्ञानजन्यत्वात् पूर्णविषयता च भक्तेर्युक्तेत्यत्र सिद्धान्तमाह।

तद्वाक्यशेषात् प्रादुर्भावेष्वपि सा ॥ ४६ ॥

सा परा भक्तिः प्रादुर्भावात्मविषयापि भवति कस्मादिदं ज्ञायते वाक्यशेषात् (गी०।अ०७।श्लो०२३)

देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि । इति।

प्रतिज्ञातार्थस्थिरीकरणाय देवतान्तरभक्तिनिन्दायां वाक्यशेषो भवति (गी०।अ०७।श्लो०२१)

योयो यांयां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ इति।

तत्र योयो यांयां भक्त इत्येतावदुक्तार्थसिद्धौ तनुपर्यन्तनिर्देशाद्भक्तेस्तत्त्वात्मविषयत्वे तात्पर्यमुन्नीयते। प्रकरणञ्च भक्तेरेवेति ॥ ४६ ॥

जन्मकर्मविदश्चाजन्मशब्दात् ॥ ४७ ॥

जन्म शरीराविनाभूतवेदप्रणयनदैत्यवधभक्तदर्शनादिकार्याय भगवतः शरीरपरिग्रहः। कर्म च वेदप्रणयनादि । तत्त्ववेदिनो जन्माभावफलाय भवति। यथाह (गी०।अ०४।श्लो०९)

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ इति।

नच जन्मकर्मवेदनस्य साक्षादमृतत्वफलमुपपद्यते। किन्तु तद्वतमनोमालिन्यनिवृत्तिद्वारा तद्विशिष्टपरमेश्वरगोचरपरभक्तिं जनयित्वा जन्माभावफलाय भवति। तस्मात् प्रादुर्भावापन्नगोचरत्वं परभक्तेः शब्दादेवावगम्यत इति ॥ ४७ ॥

तच्च दिव्यं स्वशक्तिमात्रोद्भवात् ॥ ४८ ॥

(गी०। अ०४। श्लो०९) जन्म कर्म च मे दिव्यमित्यत्र किं दिव्यत्वं न धर्मजत्वं धर्मयोगाभावात् तस्मिन्नदृष्टासिद्धेः। नापि दिविभवत्वं भूलोकजन्मन्यव्याप्तेः। किन्तु जीवशरीरवन्न भूतोपादानकत्वमपि तु स्वमायाशक्तिकृतत्वम्। अत एव मोक्षधर्मे नारदं प्रति भगवद्वाक्यम् (महाभारते। शा०। अ०३४१।)

मायैषा हि मया सृष्टा यन्मां पश्यसि नारद। इति। तथा च गीयते (गी०। अ०४। श्लो०६)

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय सम्भवामि युगे युगे ॥ इति।

न चाभौतिकत्वे शरीरत्वव्याघातः भोगायतने भौतिकत्वनियमात्। अथ भोगायतनत्वमेव शरीरत्वमिति चेन्न चेष्टाश्रयत्वस्य तत्त्वे लाघवात्। चेष्टात्वं तु क्रियागतो जातिविशेषः। नच क्रियैव चेष्टा मृतशरीरक्रियायां तव्यवहारापत्तेः। नापि साक्षात् प्रयत्नजक्रियात्वमेव चेष्टात्वं घटादावपि चेष्टत इति व्यवहृतिप्रसङ्गात्। सर्वक्रियायाः साक्षात् परमेश्वरयत्नजन्यत्वात्। एवं च परमेश्वरशरीरबोधकमानेन तच्छरीरचेष्टासिद्धिरित्यास्तां तावदिति। नच तत्त्वाधिक्यं तच्छरीरस्य ब्रह्माण्डानुपादानतया घटादिवदतत्त्वभावात् इन्द्रियाप्रकृतित्वाच्च ४८

ननु स्वतः प्रयोजनाभावे कथं प्रवर्तत इत्यपेक्षायामाह।

मुख्यं तस्य हि कारुण्यम् ॥ ४९ ॥

लोके हि निरुपाधिपरदुःखहानाय प्रवृत्तेषु कारुणिकव्यपदेशः। न चासौ तेषु मुख्यः कृपाजन्यदुःखहानाय पुण्यार्थं वाप्यन्ततः प्रवृत्तेर्न निरुपाधित्वं सम्भवति। नापि परदुःखप्रहाणमात्रप्रवृत्ते तथा धनायुपाधियुक्ते तदव्यवहृतेः। किन्तु निरुपाधिपरक्लेशनाशिनो भगवत एव मुख्यं कारुण्यम्। तत्कृत एवान्यप्रयोजनार्थिषु कारुण्यव्यवहारो गौण

इति। तस्मात् जननीयादृष्टमपेक्ष्य स्वकारुण्यात् प्रवृत्तिरिति ॥ ४९ ॥

ननु (गी०।अ०१०।श्लो०२७) नराणां च नराधिप इत्यादिना विभूतीनामपि भगवद्रूपत्वकथनाद्ब्राह्मणादिभक्तेरपि मुक्तिः स्यादित्यत आह।

प्राणित्वान्न विभूतिषु ॥ ५० ॥

जीवोपाध्यनवच्छिन्नविषयैव परा भक्तिर्न तु प्राणादिजीवोपाधिपुरुषेषु राजादिषु रक्तिर्मुक्तिफलेति ॥ ५० ॥

द्यूतराजसेवयोः प्रतिषेधाच्च ॥ ५१ ॥

धर्मशास्त्रेषु द्यूतराजसेवयोः प्रतिषेधः स्मर्यते परमेश्वरत्वे तु तन्न स्यादिति ॥ ५१ ॥

वासुदेवेऽपीति चेन्नाकारमात्रत्वात्॥ ५२ ॥

ननु (गी०।अ०१०।श्लो०३७) वृष्णीनां वासुदेवोऽस्मीति विभूतिषु श्रुतिस्तथा च राजादिवत् सोऽप्यभजनीय एव स्यादिति चेन्न परब्रह्मण एव कृष्णाकारमात्रत्वात्। यथा पराशर आह। (विष्णुपु०। अंशे५।अ०११।श्लो०२)

यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते।
यत्रावतीर्णं विष्ण्वाख्यं परब्रह्म नराकृति ॥ इति।

जीवत्वे तन्न स्यादिति ॥ ५२ ॥

प्रत्यभिज्ञानाच्च ॥ ५३ ॥

वासुदेवविषये परब्रह्मप्रत्यभिज्ञा च श्रूयते (नारायणोपनि०। अथर्वशिरसि। दशके ६। वाक्य१)

ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः।

'सर्वभूतस्थमेकं नारायणं कारणरूपमकारणं परब्रह्मस्वरूप'मिति स्मर्यते च प्रत्यभिज्ञा यथा प्रलये दृष्टानुभावेन युधिष्ठिरं प्रति मार्कण्डेयेनोक्तम् (महाभारते।वन०।अ०१८९।)

यः स देवो मया दृष्टः पुरा पद्मायतेक्षणः।
स एव पुरुषव्याघ्रः सम्बन्धी ते जनार्दन ॥ इति।

तथा (महाभार०।शां०।मोक्षधर्मे।अ० ३४५।

तपोभिरप्यदृश्यो हि भगवानिति श्रुत्वा जनमेजयेनाभिहितम्।

तपसाप्यसुदृश्यो हि भगवान् लोकपूजितः।
तं दृष्टवन्तस्ते साक्षात् श्रीवत्साङ्कविभूषणम् ॥ इति।

चकारात् तद्भक्तेषु फलस्मरणलिङ्गात् ॥ ५३ ॥

तर्हि कथं विभूतिषु तत्कीर्तनं तत्राह।

वृष्णिषु श्रैष्ठ्येन तत् ॥ ५४ ॥

(गी०। अ० १०। श्लो० २१) आदित्यानामहं विष्णुरित्यादौ तेषु श्रेष्ठत्वं परमेश्वरस्यैवेति दृष्टिमात्रार्थं विभूतिकथनं तच्च वासुदेवेऽपि वृष्णिषु श्रेष्ठोऽयमित्येतावन्मात्रदृष्टिविधानार्थं विभूतिषु वासुदेवकीर्तनमिति ॥ ५४ ॥

एवं प्रसिद्धेषु च ॥ ५५ ॥

एवमनेन प्रकारेण वासुदेववद्ब्रह्मलिङ्गवत्तया प्रसिद्धेषु वराहनृसिंहवामनरामभद्रादिषु भक्तिरपि मुक्तिफलेति बोध्यम्। यद्वा एवं ब्रह्मलिङ्गवत्तया प्रसिद्धेषु [गी०। अ० १०। श्लो० २३] रुद्राणां शङ्करश्चास्मीत्यादिविभूत्यात्मसु श्रैष्ठ्यमात्रदृष्टिर्मन्तव्या। उक्तं हि स्कान्दे। काशीखं०। पूर्वभा०। अ० २७। श्लो० १८१]

विष्णुरुद्रान्तरं ब्रूयाः श्रीगौर्यन्तरं तथा।
तद्भ्रान्तिकस्य मूर्खस्य वाक्यं शास्त्रविगर्हितम् ॥ इति।

शङ्करस्य ब्रह्मलिङ्गप्रसिद्धिः स्मृत्यादौ बहुलमुपलभ्यत इति ॥५५॥

इत्याचार्यस्वप्नेश्वरविद्वद्वरविरचिते शाण्डिल्यशतसूत्रीभाष्ये द्वितीयाध्यायस्य प्रथममाह्निकम् ॥

उक्तौ दृष्टोपकारकौ ज्ञानयोगौ सम्प्रति प्रतिबन्धकदुरितक्षयमुखेनापवर्गवत्यो गौणभक्तय उच्यन्ते।

भक्त्या भजनोपसंहाराद्गौण्या परायैतद्धेतुत्वात्॥ ५६॥

[गी०। अ०। श्लो० १३]

भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्।

इत्यनेन सप्तमाध्यायप्रतिपादितपरभक्तिमनूद्य तत्पश्चाद्गीतं (गी० अ०९। लो०१४)

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते॥ १॥

इत्यादि। तत्पश्चात् [गी० अ०९। श्लो०२९]

ये भजन्ति नु मां भक्त्या मयि ते तेषु चाप्यहम्। इति

तदुपसंहारस्ततस्तत्र [तैत्तिरीयसं०।अष्ट०२। प्र०१। अनु०६] चित्रया जयेतेतिवत् सामानाधिकरण्येन भक्तिनाम्ना भजनेन फलं भावयेदित्यर्थः। [गी०। अ०७। श्लो०१७] एकभक्तिर्विशिष्यते इत्यादौ भगवद्भक्तौ भक्तिशब्दस्य प्रयुक्तत्वेन संज्ञाप्राप्तेः भक्तिभजनयोरेकार्थत्वाच्च। नाप्यत्र परभक्तिः फलभावनया विधीयते तस्या अरुतिसाध्यत्वेनाविधेयत्वात्। न चापि तस्या निःश्रेयसहेतुत्वमज्ञातं ज्ञाप्यते (गी०। अ०७। श्लो०२३) मद्भक्ता यान्ति मामपीत्यादिना सप्तम एव तज्ज्ञापनस्यापि प्राप्तत्वात्। किन्तु परभक्तेर्विघ्ननाशनसाधनाकाङ्क्षया कीर्तनादिकमेवोपक्रान्तं भक्तिशब्देन गौण्या वृत्त्या तृतीयान्तेन निर्दिश्य परभजनसाधनत्वं तेषु विधीयते इत्यत्रार्थवादाकाङ्क्षायां (गी०। अ०९। श्लो०२९) मयि ते तेषु चाप्यहमिति पश्चादन्वयः। अन्यथा भक्त्या भजनं तेन च मयि स्थितिरिति वाक्यं भिद्येत। कीर्तनादिषु भक्तिसाधनत्वेन [तैत्तिरीयसं०। अष्ट०२। प्र०३। अनु०२] 'आयुर्वै घृत'मितिवद्भक्तिशब्दो गौणः शक्यसंस्कारेण

सुग्रह इति। यद्वा भज्यते एभिरिति व्युत्पत्त्या तासु भक्तिशब्दः [आश्वलायनश्रौतसू०। अ०९। खं०८] 'उद्गिद्वत्'। अथवा (गी०। अ० ७।श्लो०१६] चतुर्विधा भजन्ते मामिति भजनगणपाठात् सृष्टिवत्। [गी०। अ०७। श्लो०१८] उदाराः सर्व एवैते इत्यौदार्यगुणयोगाद्वा गौणत्वमिति ॥ ५६ ॥

रागार्थप्रकीर्त्तिसाहचर्याच्चेतरेषाम् ॥ ५७ ॥

एवं हि श्रुतम् [गी०। अ.११। श्लो.३६]

स्थाने हृषीकेश तव प्रकीर्त्या
जगत् प्रहृष्यत्यनुरज्यते च। इति।

तत्र साक्षादेवानुरागार्थत्वं कीर्तनस्य श्रुतम। तत्साहचर्यात् [गी०। अ० ९। श्लो० १४]

. सततं कीर्यन्तो मां यतन्तश्च दृढव्रताः।

इत्यादिनोक्तानामपि तदेव फलमिति ॥ ५७ ॥

अन्तराले तु शेषाः स्युरुपास्यादौ च काण्डत्वात् ॥ ५८ ॥

(गी०। अ० ९। श्लो० १३)

भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्।

(गी०। अ० ९। श्लो० २१)

ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्।

इत्येतयोरन्तराले या गौणभक्तयः श्रुतास्ताः परभक्त्यङ्गानि भवन्ति परभक्तिसन्देशादेवेति भावः। ता यथा (गीता०। अ० ९। श्लो० १४। १५। २२। २५। २६। २७। २८)

सततं कीर्यन्तो मां यतन्तश्च दृढव्रताः।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥
ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ इति। तथा।

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ इति । तथा ।
यान्ति देवव्रता दैवान् पितॄन् यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥ इति
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ इति । तथा
यत् करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम् ॥
शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः । इति ।

तत्र नाम्नामभिधानं कीर्तनम् । भक्त्यर्थं यच्चात्र लौकिकोऽप्यङ्गतामस्तावादुक्तः । दृढव्रतत्वं मद्भक्त्यैकादश्युपवासाद्यनुष्ठानम् । नमस्कारः स्वापकर्षबोधककरशिरःसंयोगादिव्यापारः । ज्ञानयज्ञश्च द्विधा मुख्यामुख्यभेदेन एकत्वपृथक्त्वविषयतया । तन्मात्रचिन्ता तु ध्यानमनुस्मृतिश्च । यागः पूजा भगवन्तमुद्दिश्य पत्रादिदानञ्च तथा विहितनिषिद्धसर्वकर्मणां परमेश्वरे समर्पणमिति । न केवलमेतान्येवाङ्गानि । किन्तु मनो ब्रह्मेत्युपासीत (गी०।अ०१०।श्लो०२१) आदित्यानामहं विष्णुरित्याद्युपासनादिशब्दकवलीकृतान्यपि भक्तिसाधनानि कुतः ब्रह्मकाण्डस्य सर्वस्यापि भक्तितत्साधनप्रतिपादकत्वादिति ॥ ५८ ॥

ताभ्यः पावित्र्यमुपक्रमात् ॥ ५९ ॥

ताभ्यो गौणभक्तिभ्यः पावित्र्यमन्तःकरणमालिन्यहेतुदुरितक्षयः स एव द्वारं कुतः [गी० अ० ९। श्लो० २] पवित्रमिदमुत्तममित्युपक्रम्याभिधानात् । भक्तेरन्तःकरणधर्मत्वात् पावित्र्यस्यान्तरङ्गत्वादिति ॥ ५९ ॥

तासु प्रधानयोगात् फलाधिक्यमेके ॥ ६० ॥

तास्वेव कीर्त्तनादिषु [गी०। अ० ९। श्लो० २६] यो मे भक्त्या प्रयच्छति [गी०। अ० ९। श्लो० १४] नमस्यन्तश्च मां भक्त्या इत्यादौ प्रकरणादिसिद्धाङ्गभावेषु पुनर्भक्तिसंयोगकथनं प्रवृत्तभक्तीनां तदनुष्ठाने फलाधिक्यार्थमेवेत्येक आचार्या मन्यन्ते ॥ ६० ॥

नाम्नेति जैमिनिः सम्भवात् ॥ ६१ ॥

जैमिनिराचार्यस्तु तासु गौणत्वसिद्धेः [आश्वलायनश्रौतसू० अ० ९। खं० ७] 'श्येनेनाभिचरन् यजेते'त्यादाविव भक्त्या कीर्त्तनेन भक्त्या दानेन परभक्तिं साधयेदिति सामानाधिकरण्यसम्भवान्नामभावेनान्यार्थं तां मन्यते न फलान्तरार्थं गौरवादिति ॥ ६१ ॥

अत्राङ्गप्रयोगानां यथाकालसम्भवो गृह्यादिवत् ॥ ६२ ॥

कीर्त्तननमस्यादीनां सहानुष्ठानमेकैकेन वा क्रमेण वानुष्ठानमिति त्रयः पक्षाः। तत्राद्ये कस्यचिदननुष्ठानेऽप्यन्येषां निःफलत्वप्रसङ्गः द्वितीये विकल्पप्राप्तावर्थैक्यनियमः स्यात्। तृतीयस्त्वशास्त्रार्थः। एककृतावन्यस्याननुष्ठानं च प्रसज्यते गौरवात्। तस्मादेतेषां मिथो व्यभिचारहेतुत्वमिति पूर्वपक्षः। सिद्धान्तस्तु सर्वाण्येव साधनानि प्रमाणसत्त्वात्। किन्तु सहानुष्ठाननियमो नास्ति प्रमाणाभावात्। येषां तु गन्धपुष्पधूपदीपनैवेद्यादीनामेकप्रयोगश्रवणं तेषामेव सहानुष्ठानम्। तदितरेषां तु यथाकालं यथासम्भवमनुष्ठानं गृहकृत्यादाविव यथा गृहसाधनतृणस्तम्भाद्याहरणं कदाचिदेकदा कदाचित् क्रमश इति नह्येतावता तृणादीनामकारणत्वमायाति। तस्मात् यद्यादृशदुरितक्षयसमर्थं तत् तादृशदुरितक्षयं कृत्वा सर्वैः स्वस्वसामर्थ्यं दर्शिते परभक्तिसिद्धिरिति तथा च गीयते (गी०।अ०७।श्लो०१९)।

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यत इति ॥ ६२ ॥

ईश्वरतुष्टेरेकोऽपि बली ॥ ६३ ॥

तेषु मध्ये यः कश्चिदतिशयानुष्ठानेन बलवान् भवति स एकोऽपि परमेश्वरतुष्टिं जनयित्वा परभक्तये प्रभवति बहुतरशिथिलपरिचर्याभिरपि यथा नेतरः प्रभुस्तुष्यति तुष्यति चैकेनापि निर्व्यलीकसततकृतपादसंवाहनेन तद्वत्। कीर्तनाद्यन्यतमेनापि दृढतरसेवितेन भगवत्प्रसादाद्भक्तिः प्राप्यते यथा (गी०।अ०१८।श्लो०५७)।

बुद्धियोगं समाश्रित्य मच्चित्तः सततं भव।
मच्चित्तः सर्वदुर्गाणि मत्प्रसादात् तरिष्यसि ॥ इत्यादि।

तथा कालादिकृतमपि कस्यचिद्बलम्। यथा (ब्रह्मपु०अ०९७। श्लो०१६६)।

ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन्।
यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥

इत्यादिकम्। नच व्यभिचारो बलवत्प्रत्येकजन्यभक्तिं प्रति कीर्त्तनत्वादिना हेतुत्वादिति ॥ ६३ ॥

ननु कीर्त्तनाद्यान्तरालिकानां सर्वेषामेव पावित्र्यं द्वारमुत केषाञ्चिदन्यदपीत्यत आह।

अबन्धोऽर्पणस्य मुखम् ॥ ६४ ॥

भगवत्यर्पितशुभाशुभकर्मणां स्वफलाजननलक्षणबन्धाभाव एव द्वारम्। यथोक्तम् [गी०। अ०९। श्लो०२८]।

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैरिति।

अर्पणमन्त्रोऽपि पुराणान्तरे।

कामतोऽकामतो वापि यत् करोमि शुभाशुभम्।
तत् सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहम् ॥ इति।

न चैवं स्वातन्त्र्यप्रसङ्गः तत्करणबलेन पापाचरणाभावस्यापि तदङ्गत्वात्। यथा स्मृतिः।

न वेदबलमाश्रित्य पापाकर्मरतिर्भवेत्॥ इति।

तस्मात् पावित्र्यं तदितरविषयमेवेति। अत्र शुभं कर्म स्वाश्रमविहितनित्यनैमित्तिकात्मकं बोध्यम्। सम्यगाश्रमपरिपालनाद्ब्रह्मलोकादिफलं तत्प्राप्तौ मुक्तये विलम्बः स्यादित्यादिबन्धः। ब्रह्मण्यर्पिते तु तत्प्रसिद्धिः। एवं कामाज्ञानकृतकाम्यकर्मपापयोरपि पश्चादर्पणे फलाभाव एव इति॥ ६४॥

अथ गौणीष्वेव विशेषश्चिन्त्यते तत्र श्रुतिस्मृतिमध्ये यत्स्वरूपमुच्यते यथा [छां०।] य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश इत्यादि। तथा [नारदपञ्चरात्रे । पटले १ १। श्लो० ७१]।

ध्येयः सदा सवितृमण्डलमध्यवर्ती।
नारायणः सरसिजासनसन्निविष्टः॥
केयूरवान् मकरकुण्डलवान् किरीटी।
हारी हिरण्मयवपुर्धृतशङ्खचक्रः॥ १॥

इत्येवमादि। तत्र किमेवंविधेष्वेव ध्याननियमः पूर्णप्रादुर्भावादौ वा यथाश्रुतेष्विति। तत्र ध्येयस्वरूपश्रवणान्नियमप्राप्तावुच्यते।

ध्याननियमस्तु दृष्टसौकर्यात्॥ ६५॥

ध्याने ध्येयनियमकथनं दृष्टार्थं नानाविषयत्वे चित्तविक्षेपसम्भवात्। तस्मात् सौकर्यार्थमेव तत्कथनं ज्ञेयम्। अदृष्टार्थत्वे विकल्पादिप्रसङ्गात्। तस्माद्यथाश्रुतेषु व्यवस्था। अत एव गोपीनां शिशुपालादेश्च तन्नियममन्तरेणैव ध्यानस्य दुर्लभं फलमुपलब्धमिति॥६५॥

तद्यजिः पूजायामितरेषां नैवम्॥ ६६॥

(गी०। अ० ९। श्लो० २५) यान्ति मद्याजिनोऽपि मामित्यत्र यजिः किं प्रसिद्धज्योतिष्टोमादिविषयः किं वा पूजावचन इति। तत्रायं यजिः पूजायामेव प्रयुक्तः कुतो ज्ञायते विष्णुं पूजयेदित्यादिना

नित्यकाम्यपूजा तादर्थ्ये विहिता तस्याः परभक्त्यङ्गत्वमात्रमत्र विधीयते तेन तादर्थ्यं इतरयोगानां तु नतादर्थ्यं श्रुतं तेषामीश्वरोद्देश्यकत्वं भक्तिसंयोगश्चोभयं विधातव्यमिति वाक्यभेदः स्यात्। अथ विष्णवे उरुक्रमाय सूते चरुमित्यादिविहितस्य भक्तिसंयोगोऽस्तिवति चेत् सत्यम्। काम्यानां तत्फलेनैव निराकाङ्क्षत्वात्। जीवनमात्रनिमित्तकनित्यपूजायास्तु भक्तिसंयोगविधौ बाधकाभावात् नित्यत्वे सततोपस्थितिलाघवाच्चेति। अत एव मोक्षधर्मे हिंसायुक्तधर्मनिन्दायाम्। [महाभारत०। शां०।अ० २६५।]

सर्वकर्मस्वहिंसां हि धर्मात्मा मनुरब्रवीत्।
कामरागा हि हिंसन्ति बहिर्वेद्यां पशून् नराः॥
विष्णुं ये चाभिजानन्ति धर्मादेव यजन्ति ते।
पायसैः सुमनोभिश्च तथापि यजनं स्मृतम्॥ ६६॥ इति।

अथ पूजाप्रस्तावादधिकरणत्रयम्।

पादोदकं तु पाद्यमव्याप्तेः॥ ६७॥

एवं स्मर्यते। [नृसिंह पु०। अ० ५९। श्लो० ४६]

गङ्गाप्रयागगयपुष्करनैमिषाणि।
पुण्यानि यानि कुरुजाङ्गलयामुनानि॥
कालेन तीर्थसलिलानि पुनन्ति पापान्।
पादोदकं भगवतः प्रपुनाति सद्यः॥ १॥

इत्यत्र। तत् किं पादसंयुक्तं जलंपादोदकमुत पादे दत्तकोत्सृष्टं जलम्। तत्र पाद्यमेव पादोदकं कुतो ज्ञायते अन्यथाऽव्याप्तिप्रसङ्गात्। तथाहि भगवतः साक्षात्पादसम्बन्धो न सम्भवति। नाप्यवतारद्वारा तस्याप्यनुष्ठातृसन्निधानासम्भवात्। किन्तु पूजाधिष्ठानप्रतिमापादसम्बन्धादुपचारस्तत्रापि प्रतिष्ठितायाः अप्रतिष्ठितायास्तु पूजार्थमाहरणे सति तथा च शालिग्रामशिलायधिष्ठाने पादाभावे तच्च स्यात्।

तत्रैवं व्याप्त्यनुरोधात् पाद्यमेवास्तु प्रतिमाद्यत्यन्तव्यवहितसम्बन्धकल्पनाप्रसङ्गात् ॥ ६७ ॥

स्वयमर्पितं ग्राह्यमविशेषात् ॥ ६८ ॥

पूजायां भगवते दत्तं नैवेद्यनिर्माल्यादिकं वैष्णवं सात्वतेभ्य इत्यादिना प्रतिपाद्यत्वेन विहितं तदिह सात्वतत्वाविशेषादेव भगवद्भक्तेन स्वयमपि ग्राह्यं भोजनधारणादिना स्वोपकार्यमित्यर्थः। स्वयमपि ग्रहणे प्रतिपत्तिः सिध्यति। धर्मशास्त्रं तु वर्जनीयमेव यथा अग्न्याद्युद्देशेन त्यक्तपुरोडाशस्यापि उत्तरार्द्धात् स्विष्टकृतमवद्यति यजमानपञ्चमाः पुरोडाशं भक्षयन्तीति प्रतिपत्तिस्तथेदमपि वचनादेव। अन्यथा सात्वतेभ्योऽपि न प्रतिपादयेत् परद्रव्यत्वात्। वचनादिति चेन्न. नहि वचने स्ववर्जनमुक्तम्। अथ ब्राह्मणेभ्यो दद्यादित्यादिना ब्राह्मणत्वादात्मनेऽपि दानप्रसङ्गादिति चेन्न दानस्य स्वस्वत्वध्वंसेन परस्वत्वापादानुरूपत्वात्। नचैवं प्रतिपत्तौ युक्तं पुरोडाशस्यापि यजमाने प्रतिपत्तिदर्शनात् क्रयादिवत् प्रतिपत्तिरपि स्वत्वापादिकैव। तदेवं यत्रान्यसात्वताऽसंपत्तिस्तत्र स्वयं ग्रहणेनाप्यवैगुण्यं परिहार्यमेव। तथा स्वयं दत्तपाद्यादिधारणेऽपि ज्ञेयमिति। किञ्च (गी० । अ० ३ । श्लो० १२) 'तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेनएव स' इत्यत्र समानकर्तृकत्वात् स्वत्वध्वंसे समानकर्मत्वप्रतीतेः। क्वासमभिव्याहृतनञः सामाधिकरण्येनान्वयात् तैर्दत्तानित्यत्र तज्जातीयपरत्वे मानाभावात्। तस्माद्बाधकं विना देवेभ्यो दत्तमपि भोक्तव्यमिति ध्येयम् ६८

निमित्तगुणाव्यपेक्षणादपराधेषु व्यवस्था ॥ ६९ ॥

[वराहपुराणे । अ० १२४ श्लो० ४] देवपूजापराधास्ते द्वात्रिंशत् परिकीर्त्तिताः। इत्युपक्रम्य द्वात्रिंशापराधास्तत्तत्प्रायश्चित्तानि च विहितानि तत्र किं सर्वापराधवर्जनं पूजाङ्गमुत केषांचिद्वर्जनमङ्गं केषांचित् पुरुषार्थ इति। अत्रोच्यते (वराहपु०।अ०१२४।श्लो०६५)

अकर्मण्येन पुष्पेण यो मामर्चयते नरः।
पतनं तस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे॥ १॥ इत्यादि।

तत्राकर्मण्यानां पुष्पाणां पर्युदस्तत्वान्न पूजाङ्गत्वम्। किन्तु पूजाक्रमप्रयोगमध्ये श्रमादिनार्पणे कृते तन्निमित्तमपेक्ष्य प्रायश्चित्तम्। यत्र तु (वराहपु०अ०२५।श्लो०३६) अदत्वा गन्धमाल्यानि धूपं यो मे प्रयच्छतीत्यनेन पूजाक्रमभङ्गापराधे तत्तत्क्रमस्य पूजाङ्गत्वादङ्गवैगुण्यपरिहारात् तत्प्रायश्चित्तस्याङ्गत्वं द्रष्टव्यम्। यत्र पूजामन्तरेण (वराहपु०।अ०१२५।श्लो०१) दन्तकाष्ठमखादित्वा यस्तु मामुपसमुपैतीत्यादि श्रुतं तत्र व्यक्तमेव पुरुषार्थत्वमिति व्यवस्थैवेति॥ ६९॥

एवं पूजाया भक्तिसंयोगसिद्धौ (गी०अ०९।श्लो०२६) पत्रं पुष्पं फलं तोयमित्यनेन भगवदुद्देश्यकदानमात्रस्य भक्त्यङ्गत्वविधिरित्याह।

पत्रादेर्दानमन्यथा हि वैशिष्ट्यम्॥७०॥

यद्यदिष्टतमं लोके यच्चान्यद्दयितं गृहे।
तत् तद्धि देयं प्रीत्यर्थं देवदेवाय चक्रिणे॥

इत्यादिना प्राप्तस्य भगवदुद्देश्यकसर्वदानस्य भक्त्यङ्गत्वविधिः। अन्यथा पत्रादिचतुष्टयविशिष्टदानमेव स्यात्। प्रत्येकविधौ वाक्यभेदः। तस्मात् पत्रादिशब्देन प्राप्तं दानमनूद्य (तैतिरीय सं०) 'उपव्ययत' इत्यनेन नित्योपवीतस्य दर्शाङ्गत्ववदङ्गत्वविधिरेव युक्त इति७०

सुकृतजत्वात् परहेतुभावाच्च क्रियासु श्रेयस्यः॥७१॥

ता भक्तयः सर्वकर्मसु श्रेयस्य एव कुतः परभक्तिहेतुत्वात् इतरधर्मजन्यत्वाच्च यथा (गी०अ०४।श्लो०१०।११)

बहवो ज्ञानतपसा पूता मद्भावमागताः।
ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्॥ इति।

भावशब्दश्च भक्तौ प्रयुक्तः।

गङ्गाजले किं न वसन्ति मत्स्याः।
देवालये पक्षिगणा वसन्ति॥
भावोज्झितास्ते न फलं लभन्ते।
तीर्थाच्च देवायतनाच्च मुख्यात्॥ इत्यादौ।

तथा (गी०अ०७।श्लो०१६)

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन॥ इति।

अत्र पूर्वसुकृतजत्वाद्भक्तीनां तास्तेभ्यो मुख्याः एतेन भक्तिमीमांसायां विचारो युज्यते न कर्ममीमांसायामित्युक्तम्॥ १७॥

ननु भक्तानां न गौणमुख्यभावस्तथा सति (गी०।अ०७।श्लो०।१६)

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥ इति।

चतुर्णां तुल्यवदभिधानं किं कृतमित्यत आह।

गौणं त्रैविध्यमितरेण स्तुत्यर्थत्वात् साहचर्यम्॥ ७२॥

गौणं त्रैविध्यमेव तासां मुख्येन साहचर्य्यश्रवणं तु स्तुत्यर्थम्। यथा राजसमभिव्याहारेणामात्यानाम्। एवञ्च पापक्षयविपदुद्धारादिनिमित्तं स्मरणकीर्तनाद्यार्त्तभक्तिः ज्ञानार्थं यज्ञाद्याचरणं जिज्ञासोर्भक्तिः। यथा च (बृहदा०) 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेने'त्यादि। तथा (गी०।अ० १८। श्लो० ४८)

स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दन्ति मानवाः।

[विष्णुपु०।अं० ३।अ० ७।श्लो० १६]

न चलति निजवर्णधर्मतो यः।
सममतिरात्मसुहृद्विपक्षपक्षे॥
न हरति न च हन्ति किञ्चिदुच्चैः।
स्थितमनसं तमवेहि विष्णुभक्तम्॥

इत्यनेन स्वस्ववर्णाश्रमविहितवेदानुवचनादीनां ज्ञानार्थमनुष्ठानं जिज्ञासा भक्तिः। अर्थार्थिता भक्तिरपि द्विधा तत्रैका परमभक्त्यर्थं क्रियमाणा पूर्वोक्ता राज्यस्वर्गार्थं क्रियमाणा च कीर्त्तनादिरूपाऽपरा। यथा [विष्णुपु०। अं० ३। अ० ७। श्लो० ३]

भौमान् मनोरथान् कामान् स्वर्गिवन्द्यं परं पदम्।
प्राप्नोत्याराधिते विष्णौ निर्वाणमपि चोत्तमम्॥ इति।

तत्र निर्वाणप्राप्तिः परभक्तिद्वारेति परभक्तिप्रयोजनार्थिता (गी०। अ० ९।श्लो०१९) ये भजन्ति च मां भक्त्या मयि ते तेषु चाप्यहमित्यनेनसहैकवाक्यत्वात्। यच्च भागवते (स्कन्ध ७। अ० ५। श्लो०२२।२३)

श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा। इति।

तदेतेष्वेव यथायथमन्तर्भावनीयम् तदेवमुपाधीनामेषामुपधेयसाङ्ग्येऽपि न दोष इति॥ ७२॥

ननु कीर्त्तनादीनामङ्गत्वे कथमार्त्यादिषु प्राधान्यं घटते इत्यपेक्षायामुच्यते।

बहिरन्तरस्थमुभयमवेष्टिसववत्॥ ७३॥

स्मरणकीर्त्तनादीनां परभक्त्यङ्गतया तदन्तर्गतत्वमनारभ्य फलान्तरश्रवणात् तद्बहिर्भावेनोत्कर्षोऽपि। यथा राजसूयान्तर्गताप्यवेष्टिः प्रधानापि अनारभ्य फलान्तरसम्बन्धात् तत उत्कृष्यते। यथा वा बृहस्पतिसवः क्वचित् प्रधानमपि वाजपेयाङ्गं तद्वत् प्रमाणसत्त्वसत्त्वाभ्यां विशेषात्। एवं

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥

इत्यनेन सर्वकर्मणां नैमित्तिकाङ्गत्वेनापि प्रवृत्तेः। स्वभावाङ्गत्वं स्वर्गादिफलाय प्राधान्यं च न विरुद्धमिति ॥ ७३ ॥

इदानीमार्त्तभक्तौ विशेषश्चिन्त्यते।

स्मृतिकीर्त्त्योः कथादेश्चार्तौ प्रायश्चित्तभावात् ॥ ७४ ॥

स्मरणकीर्त्तनकथानमस्कारादीनामार्त्तभक्तौ निवेशस्तत्तत्पापकृत-नरकार्त्तिमतां तत्तत्पापक्षयहेतुत्वेन कथनात् यथा [विष्णुपु०। अं० २। अ० ६। श्लो० ३२।३३]

पापे गुरूणि गुरुणि लघूनि च लघुन्यपि।
प्रायश्चित्तानि मैत्रेय जगुः स्वायंभुवादयः ॥ १ ॥
प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥ २ ॥

तथा (विष्णुपु०। अं० ६। अ० ७। श्लो० ९)

यन्नामकीर्त्तनं भक्त्या विलापनमनुत्तमम्।
मैत्रेयाशेषपापानां धातूनामिव पावकः ॥

एवं [महाभार०। शां०। मोक्षध०। अ० ३४५।]

सर्वाश्रमाभिगमनं सर्वतीर्थावगाहनम्।
न तथा फलदं सौते नारायणकथा यथा ॥
पाविताङ्गाः स्म संवृत्ताः श्रुत्वेमामादितः कथाम्।
नारायणाश्रयां पुण्यां सर्वपापप्रणाशिनीम् ॥ इत्यादि।

तस्माद्युक्तमार्त्तौ निवेशनमिति ॥ ७४ ॥

भूयसामननुष्ठितिरिति चेदाप्रयाणमुपसंहारान्महत्स्वपि ॥ ७५ ॥

स्यादेतत् न्यायविरोधादेतद्वचनानां स्वल्पपापविषयत्वमेव युक्तम्। अन्यथा भूयः क्लेशसाध्यानामननुष्ठानलक्षणमप्रामाण्यमिति चेन्न

तेषामामरणमुपसंहारस्मरणात् क्लेशाधिक्यात्। यथा (विष्णुपु०। अं० २। अ० ६। श्लो० २९)

तस्मादहर्निशं विष्णुं संस्मरन् पुरुषो मुने।
न याति नरकं शुद्धः संक्षीणाखिलकल्मषः॥

इत्यनेन सातत्योपसंहारात् उपक्रमोपसंहारयोरेकार्थत्वादिति भावः। न चोपक्रमे कालः श्रूयते येन तद्विरोधादुपसंहारस्य भिन्नार्थतापि भवेत्। तथा च क्लेशसाम्यादितरेषां माननुष्ठानमप्रामाण्यम् (विष्णुपु०। अं० २। अ० ६ श्लो० ३५) प्रातर्निशि तथा सन्ध्यामध्याह्नादिषु संस्मरन् इत्येतदवयुत्यानुवाद एव। नाप्यनुतप्ताधिकारिकमिदम्। (विष्णुपु०। अं० २। अ० ६। श्लो० ३४)

कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते।
प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम्॥

इत्यस्यापि सर्वप्रायश्चित्ताङ्गानुतापस्यानुवादत्वादेकमित्यस्यापि प्रायश्चितान्तरनैरपेक्ष्यस्य न्यायप्राप्तस्यानुवादः। अन्यथा वाक्यानि भिद्येरन् विशिष्टविषयाश्च भवेयुः। अतो यच्छब्दान्तर्गतत्वाद्यथायथमनुवादत्वान्नार्थवादत्वं पूर्ववाक्यानाम्। अत एवान्यत्रापि (विष्णुपु०। अं० ३। अ० ७। श्लो० ३४।३५)

किङ्करा दण्डपाशौ वा न यमो न च यातनाः।
समर्थास्तस्य यस्यात्मा केशवालम्बनः सदा॥
चक्रायुधस्य नामानि सदा सर्वत्र कीर्त्तयेत्।
नाशौचं विद्यते तस्य स पवित्रकरो यतः॥

इत्यादिभिः सातत्यमुक्तमिति॥ ७५॥

लघ्वपि भक्ताधिकारे महत्क्षेपकमपरसर्वहानात्॥७६॥

लघ्वपि सकृत्स्मरणकीर्त्तनादि महतामपि पापानां क्षेपकं नाशकं भवति। यतो भक्ताधिकारे प्रायश्चित्तान्तराणां सर्वेषां त्यागलक्षणहा-

निप्रतीतेरित्यर्थः। यथा गीतम् (गी०। अ० १८। श्लो० ६६)

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि माशुचः॥ इति।

अत्र हि न काम्यकर्मत्यागपूर्वकत्वमर्थः काम्यत्यागे पापाभावात् किं भगवता मोक्षणीयम्। अथ पापान्तरं नाश्यं काम्यत्यागस्यादृष्टार्थत्वापत्तेः नित्यनैमित्तिकयोरपि त्यागपूर्वकता न तस्यार्थः तयोस्त्यागे यदि विधिरस्ति न ततः पापं किं मोक्षणीयम्। अथ नास्तीति वाच्यम्। मैवम्। एवं वाक्येनैव तद्विधानात् पापाजनकत्वात्। अथ सर्वधर्मान् परित्यज्येत्यनेन संन्यासिनमनूद्य तदधिकारिकमिदं तेषामवकीर्णादिप्रायश्चित्तादिस्मरणात् तैः सह विकल्पप्रसङ्गात् पूर्ववन्महतामननुष्ठानं च स्यात्। न च सातत्येन तद्दोषपरिहारः।

महापातकयुक्तोऽपि ध्यायन्निमिषमच्युतम्।
पुनस्तपस्वी भवति पंक्तिपावनपावनः॥

इत्यादिना लघुनोऽपि महत्क्षेपकत्वात्। किञ्च संन्यासाश्रमस्यासन्निधानेन बुद्ध्यनारोहात्। तस्मायथा लोके सर्वान् विहाय मां भज क्लेशांस्ते नाशयिष्यामीत्यत्र क्लेशनाशकान्तरहानिः प्रतीयते। तथान्तरपापनाशकान्तरत्यागोऽवगम्यते वाक्यादेव। एतेन कथं चित्संन्यासविधायकेन सहैकाध्यायपाठेऽपि न तद्विषयकत्वं प्रकरणसन्निधानयोः सबलत्वात्। किञ्चास्मिन्नध्याये। (गी०। अ० १८। श्लो० २) काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुरित्यादिना काम्यकर्मत्याग एवोक्तो न संन्यासाश्रमः एवञ्च प्रायश्चितान्तरत्यागसङ्कल्पेन केवलभगवन्नामादिभिरार्त्ति यस्तर्त्तुमिच्छति तदधिकारिकमेव सकृत्स्मरणादि तथा च भिन्नाधिकाराद्दूषणानां समुच्चितिः। नापि क्लेशभयाद्दूयसामननुष्ठानम्। (गी० अ० १८। श्लो० ८)

दुःखमित्येव यत् कर्म कायक्लेशभयात् त्यजेत्।

स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥

इत्यनेन तादृशसंन्यासस्य हेयत्वात् । (विष्णुपु० । अं० ६ । अ० ७ । श्लो० १०)

कलिकल्मषमत्युग्रं नरकार्त्तिप्रदं नृणाम् ।
प्रयाति विलयं सद्यः सकृद्यत्रानुसंस्मृते ॥ इत्यादि ।

तदधिकारपरम् । एवम् (गी० । अ० ९ । श्लो० ३० । ३१)

अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥
क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं नियच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥

इत्यनेन तथा (नृसिंहपु० । अ० ८ । श्लो० २८ । २९)

नारकाः कृष्णकृष्णेति नारसिंहेति चुक्रुशुः ।
इति संकीर्त्तितो विष्णुर्नारकैर्भक्तिपूर्वकम् ।
नारक्यो यातनाः सर्वास्तेषां नष्टा महात्मनाम् ॥

इत्यादिना च भक्त्यधिकारः सुव्यक्त इति । अत्र कीर्तनस्योच्चारणत्वमात्रमिह प्रतीतम् । नतु प्रथमान्तपदेनेत्यादिनियम इति ॥७६॥

ततूस्थानत्वादनन्यधर्मः खले वालीवत् ॥ ७७ ॥

(विष्णुपु०।अं०२। अ० ६ । श्लो० ३४) प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परमित्यादौ नामाऽतिदेशेन प्रायश्चित्तान्तरधर्मस्तु न मन्तव्यः । प्रायश्चित्तस्थानत्वात् तत्स्थाने तद्विधानादित्यर्थः । यथा(आश्वलायनश्रौतसू० । अ० ९ । खं० ७) 'खले वाली यूपो भवती'त्यत्र पशुनियोजने यूपकार्ये खले वालीविधिरिति । यूपधर्मस्याष्टालिकरणादेः प्रसङ्गस्तद्वदत्र नखलोमादिवपनानां प्रायश्चित्तधर्माणामप्राप्तिरिति । न कीर्तनादेरपि पापक्षयहेतुत्वात् प्रायश्चित्तमेवेति वाच्यम् ।

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।

तयोर्निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम्॥

इत्यनेन तपोरूपे प्रायश्चित्तशब्दो मुख्यः अन्यत्र गौण इति ध्येयम्॥ ७७॥

अथाङ्गानां प्रधानाधिकरणनैयत्यात् तदधिकारश्चिन्त्यते।

आनिन्द्ययोन्यधिक्रियते पारम्पर्यात् सामान्यवत्॥ ७८

निन्दितचाण्डालादियोनिपर्यन्तं भक्तावधिक्रियते संसारदुःखजिहासाया अविशेषात्। अथ वेदाध्ययनानधिकारात् कथमत्र त्रैवर्णिकानां स इति चेत् तत्राह पारम्पर्यादिति। (पूर्वमीमांसासू०। अ०१। पा० १ । सू०२) 'चोदनालक्षणोऽर्थो धर्मः (उत्तरमीमांसासू०) अ० १। पा० १।सू०३] 'शास्त्रयोनित्वा'दिति न्यायादलौकिकोऽर्थः श्रुत्यैकसमधिगम्य इत्यत्र न विप्रतिपद्यामहे। किन्तु स्त्रीशूद्रादीनामितिहासपुराणादिद्वारा चाण्डालादीनां च स्मृत्याचारवदुपदेशपारम्पर्येण ज्ञानमपि श्रुतिमूलमेव भवति यथा तेषां सामान्याऽहिंसाधर्मादिज्ञानम्। अन्यथा तदसिद्धिप्रसङ्गादिति॥ ७८॥

अतो व्यविपक्वभावानामपि तल्लोके॥ ७९॥

यतः सर्वाधिकारोऽतः खलु येषामत्र परभक्तिर्विपक्वभावं न गता तेषां श्वेतद्वीपे भगवल्लोके परभक्तिसाधनानुष्ठानं स्मर्यते। यथा [महाभार०] शां०। मोक्षधर्मे। नारायणीये। (अ० ३३८।)

क्षीरोदधेरुत्तरतः श्वेतद्वीपो महाप्रभः।
तत्र नारायणपरा मानवाश्चन्द्रवर्चसः॥
एकान्तभावोपगतास्ते भक्ताः पुरुषोत्तमे।

इत्याद्युपक्रम्य तेषां परभक्तिसाधनानुष्ठानं श्रुतम्। [महाभारशां०। मोक्षधर्मे। अ०३३८।]

सहिताश्चाभ्यधावन्तस्ततस्ते मानवा द्रुताः।
कृताञ्जलिपुटा हृष्टा नम इत्येव वादिनः॥

ततो विवदतां तेषामश्रौषं विपुलध्वनिम्।
बलिः किलोपक्रियते तस्य देवस्य तैर्नरैः॥

इत्यादि। तस्मात् सर्वत्र तदधिकार इति। अत एव [उत्तरमीमांसासू०। अ०१। पा०३। सू२६]'तदुपर्यपि बादरायणेन सम्भवादि'ति सूत्रितम्॥ ७९॥

अथ विपक्वभावानामपि कथं न तल्लोक इत्युपोद्घातेनोच्यते।

क्रमैकगत्युपपत्तेस्तु॥८०॥

तुश्चागतशङ्काव्यवच्छेदार्थः। नारायणीय एव श्रूयते (महाभार०। शां०। अ०३४६।) येऽतिनिष्कलुषा लोके पुण्यपापविवर्जिता इत्युपक्रम्य आदित्यमण्डलद्वारा अनिरुद्धप्रद्युम्नसंकर्षणव्यूहक्रमेण गतिमभिधायाभिहितम्। [महाभार०। शां०। अ०३४६।]

समाहितमनस्कास्तु नियताः संयतेन्द्रियाः।
एकान्तभावोपगता वासुदेवं विशन्ति ते॥ इति।

क्रमगत्यभिधानम्। तथा पश्चादुक्तम्। [महाभार०। शां०।मोक्षधर्मे। अ०३५०।]

ये तु दग्धेन्धना लोके पुण्यपापविवर्जिताः।
तेषां त्वयाभिनिर्दिष्टा पारंपर्यक्रमाद्गतिः॥
चतुर्थ्यां चैव ते गत्यां गच्छन्ति परमं पदम्।
नूनमेकान्तधर्मोऽयं श्रेष्ठो नारायणप्रियः॥
अगत्वा गतयस्तिस्रो यद्गच्छन्त्यव्ययं हरिम्।

इत्येकगत्यभिधानं च पक्वभक्तिविषयत्वेनोपपद्यते। अन्यथा विरोधात् तस्मादपक्वविषयस्तत्तल्लोकलाभ इति॥ ८०॥

उत्क्रान्तिस्मृतिवाक्यशेषाच्च॥८१॥

उत्क्रान्तौ। गी०। अ०८। श्लो०१०। भक्त्या युक्तो योगबलेन चै

वेत्युपक्रम्य (गी०। अ०।८। श्लो०१३)।

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्।
यः प्रयाति त्यजन् देहं स याति परमां गतिम्॥

इत्युक्तम्। तत्र च वाक्यशेषः। (गी०। अ०८। श्लो०२४)।

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः॥ इति

क्रमाद्गतिः श्रुता। तथा। (गी०। अ०८। श्लो०१६)।

आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते॥

इतिवाक्यशेषे लोकोपक्रमादुपशब्दमहिम्ना च तत्समीपलोकप्राप्तिरविपक्वभावानामेव युक्ता विपक्वभावस्य न तल्लोकगमनमपि फलं युज्यते तत्फलस्याक्षयित्वात् तल्लोके साधनाननुष्ठानश्रवणाच्च। किञ्च अविपक्वभक्तेस्तत एव क्रममुक्तिसिद्धौ तत्कालीनस्मरणविधिवैयर्थ्यप्रसङ्गात्। न च तेन परभक्तिसमुच्चयो घटते। (गी०।अ०८। श्लो०२२) पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्ययेत्यन्यनिरपेक्षमोक्षसाधनत्वावगतेः। तस्मात् तल्लोकेऽप्यधिकारः। भारतभूमेस्तु (विष्णुपु०। अं०२। अ०३। श्लो०५)

न खल्वन्यत्र मर्त्यानां भूमौ कर्म विधीयते॥

इत्यनेन कर्मोत्पत्तिहेतुतैव। भक्तिस्तु न कर्मात्मिकेत्युक्तं प्राक् तदङ्गानामप्राप्तिः स्यादिति चेन्न प्रधानप्राप्तावेवाङ्गप्राप्तेर्निषादस्थपतियागाङ्गत्ववदिति। शूद्रादीनां तु वैदिकमन्त्रजकर्मनिवृत्तिर्न तु स्मरणकीर्त्तनादेर्भक्तिसाधनस्येति तावतैवाधिकारसिद्धौ न विद्याप्रयुक्तिकल्पना युक्ता॥ ८१॥

अस्तु तर्हि महापातकिनामपि परभक्तावेवाधिकारस्तथा तदङ्गाङ्गत्ववेदानुवचनादावपीत्यत आह।

महापातकिनां त्वार्तौ ॥ ८२ ॥

पतनहेतुपापरतानां च पुनरार्त्तिभक्तावेवाधिकारः प्रायश्चित्तवन्नान्यत्र तत्पापक्षयस्य सर्वापेक्षयाऽभ्यर्हितत्वात् भुञ्जानोषर्द्धयेत् पापमित्यादिना। तदपगमे तु सुतरामधिकारसिद्धिः ॥ ८२ ॥

अथैकान्तिकप्रस्तावात् सर्वधर्मः किं परभक्तितो भिन्न इति शङ्कापिशाचीमपाकरोति।


सैकान्तभावो गीतार्थप्रत्यभिज्ञानात् ॥ ८३ ॥

सा परा भक्तिरेवैकान्तभावो नान्यः कुतः गीतार्थेन प्रत्यभिज्ञाश्रवणात्। यथा नारायणीय एव (महाभार०।शां०।मोक्षध०।अ०३५०।

सहोपनिषदो वेदान् ये विप्राः सम्यगास्थिताः।
पठन्ति विधिमास्थाय ये चापि यतिधर्मिणः॥
ततो विशिष्टां जानामि गतिमेकान्तिनां नृणाम्।
केनैष धर्मः कथितो देवेन ऋषिणाथ वा॥

इति प्रश्ने प्रत्युत्तरम्।

समुपोढेष्वनीकेषु कुरुपाण्डवसेनयोः
अर्जुने विमनस्के वै गीता भगवता स्वयम्॥ इति।



तस्मादेकान्तिता परभक्तिरिति ॥ ८३ ॥

अथ गौण्योऽपि साक्षान्मुक्तिं जनयन्तु को दोषस्तत्राह।

परां कृत्वैव सर्वेषां तथात्याह ॥ ८४ ॥

परां भक्तिं कृत्वैव सर्वेषां मुक्तावुपयोगः। तथा हि सहेतुकं भगवानाह (गी०। अ०१८।श्लो०६८।)

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयम्॥ इति।

तच्चैतद्धर्मस्योपदेशफलमपि ब्रह्मभावायत्तिरित्येवार्थसिद्धौ भक्तिं

मयि परां कृत्वेति किमर्थमाह । तस्या मोक्षसाधनत्वेन श्रुतत्वात्। अत एवोपरिचरवसोः (महाभार० । शां० । अ० ३३७ ।) आत्मराज्यं धनं चेत्यादिना परमेश्वरानुरक्तिरूपाया भक्तेर्लिङ्गं प्रदर्शितमिति स्वतः प्रयोजनत्वाभावात् । तस्मात् सर्वेषां मुक्तिहेतुत्वेन श्रुतानां परभक्तिजननेन मुक्तावुपयोग इत्याभिप्राय उन्नीयतइति। नचोभयजनकत्वं तस्य कर्मत्वेन मोक्षाजनकत्वात् । एवञ्च दृष्टार्थता भवति वाक्यस्येति ॥ ८४ ॥

इत्याचार्यस्वप्नेश्वरविद्वद्वरविरचिते शाण्डिल्यशतसूत्रीये भाष्ये द्वितीयाध्यायस्थ द्वितीयमाह्निकम् ॥ ॥

समाप्तश्चाध्यायः ॥ २ ॥

भजनीयोत्तमत्वेन भक्तेरुत्तमता यतः ।
भक्तस्वभावतश्चात्र भजनीयो निरूप्यते ॥

भजनीयेनाद्वितीयमिदं कृत्स्नस्य तत्स्वरूपात् ॥ ८५॥

ज्ञानाधीना ज्ञेयसिद्धिरिति तन्त्रेषु निर्णयः ।
ज्ञानं सत्ता न सा जातिर्जात्यादौ तदसत्त्वतः ॥
सत्त्वे वा नेष्टसम्बन्धकल्पनागौरवादपि ।
तस्माज्ज्ञानं परं ब्रह्म सर्वत्रानुगतं स्वतः ॥
तदभेदो दृश्यमात्रे दृश्यभेदस्तु सत्परे ।
घटो ज्ञानमितीदृक् स्यात् प्रत्ययः सन्निवेति चेत् ॥
अस्ति स्वरूपधीर्नैव सत्यत्वेनानुपस्थितेः ।
तदुपादानविषये ज्ञानेच्छाकृतिहेतुना ॥
तासां सविषयत्वेन हेतुत्वे लाघवं महत् ।
यत् तत् सविषयं ब्रह्म गुणवन्नैव गौरवात् ॥
कालवेषोपाधिकृता तज्ज्ञातृत्वादिकल्पना ॥ ८५ ॥


तच्छक्तिर्माया जडसामान्यात् ॥ ८६ ॥

तस्य ब्रह्मण ऐश्वर्यशक्तिर्मायेति गीयते (गी०अ०७।श्लो०१४।)

दैवी ह्येषा गुणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥
मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्।
हेतुनानेन कौन्तेय जगद्विपरिवर्त्तते ॥
तन्मायात्वं तु कार्याणां वैचित्र्यान्नानृतत्वतः।
कार्यसत्त्वोपपत्त्यर्थं ब्रह्मसत्ताश्रुतेरिति ॥
मिथ्यात्वस्यानुषक्तेश्च तन्मिथ्यात्वं न साम्प्रतम्।
तत्त्वज्ञानेन बाध्यत्वं मिथ्यात्वमिति चेन्नहि ॥
मिथ्यात्वस्याप्यतथ्यत्वात् सत्यत्वं सुतरां स्थितम्।
मिथ्यात्वस्य च सत्यत्वे दृश्यसत्यत्वमागतम् ॥
अनीकानामभानाच्च भास्यत्वे तु सदेव तत्।
रज्जौ सर्पादिभानं यदन्यथाख्यातिरेव सा ॥
अन्यस्य सदसत्त्वाभ्यां बाधाधारव्यवस्थितेः।
सा माया जडसामान्यं ज्ञेयत्वं नित्यमेव तत् ॥
अन्यथा तु व्यवस्था स्यात् तस्माच्चिज्जाड्यनित्यता ॥ ८६ ॥

व्यापकत्वाद्व्याप्यानाम् ॥ ८७ ॥

एवं व्यापकतत्त्वेभ्यो व्याप्यतत्त्वसमुद्भवः।
व्यापकानां हि तादात्म्याद्व्याप्योपादनता मता ॥
न तावत् समवायेन भेदसम्बन्धगौरवात्।
शब्दानां समयोऽप्येवं शृङ्गग्राहिकया लघुः ॥
सत्त्वेन सर्वकार्येषु कारणत्वं परेशितुः।
निमित्तत्त्वं हि तद्बुद्धेर्बोद्धव्येष्वनुगत्वतः ॥



बुद्धेस्तु साक्षिभास्याया अबोध्यत्वं यतो धियः।
बोद्धव्याया बुद्धितत्त्वव्यभिचारेऽपि सम्भवेत्॥
सुप्तोत्थितस्य प्रलयाद्बुद्धेः प्रथममुद्भवः।
कार्यकारणभावादि बुद्ध्या निर्माति स प्रभुः॥
स्वतो निर्विषयाप्येषा चैतन्योपाधिभावतः।
तैलादिवत् प्रदीपस्था स प्रकारप्रकाशिनी (छां०।)
करिष्यामीतिसङ्कल्पादहङ्कारोद्भवस्ततः।
स ऐक्षत बहुस्यामित्येवमादिश्रुतिस्मृतेः॥
बुद्धेर्विकारेष्विच्छादावनुगत्वादहङ्कृतेः।
साप्येकतत्त्वं तत्त्वे तु बुद्धिर्व्यापकभावनात्॥
ईशोऽहं कृतिजन्यत्वात् तन्नैयत्यादहङ्कृतेः।
मात्राभूतेन्द्रियादीनामहङ्कारोऽपि कारणम्॥
तत्र शब्दस्पर्शरूपरसगन्धत्वसंज्ञया।
सामान्यान्येव शब्दादिस्थूलानां चापि हेतवः॥
सर्वत्र ग्रह एव स्यात् तत्त्वानामिति चेदतः।
विकारग्रहणे जातिग्रहवत् तद्ग्रहस्थितेः॥
एवं व्यापकतत्त्वानां व्याप्येष्वनुगमः क्रमात्।
ब्रह्मादिसर्वतत्त्वानां घटोपादानता स्फुटम्॥
न कर्मणान्यथासिद्धिरिह तत्त्वस्य युज्यते।
तादात्म्यादन्यथासिद्धेरतादात्म्यप्रयोजकम्॥
एवं कारणतत्त्वानां मोक्षोपायतया पुनः।
निर्मितिः प्राणिबुद्ध्यादेरतादात्म्यात् पृथक् पृथक्॥
आसर्गप्रलयादीनां बुद्धिर्नास्ति न यत् क्वचित्।
सुषुप्तौ जीवबुद्धीनां लयोनन्तः स मोक्षणे॥ ॥ ८७॥
अथानीश्वरसाङ्ख्यानां बुद्धेः सर्गो न युज्यते।

क्रमाद्विनिगमाभावादित्येतत् सूत्रमुच्यते ॥

न प्राणिबुद्धिभ्योऽसम्भवात् ॥ ८८ ॥


क्रमाद्देवर्षिसर्गादिः श्रूयते कस्य बुद्धितः ।
सम्भवाद्भूतसर्गोऽयं तस्मादीशोऽस्ति बुद्धिमान् ॥ ८८ ॥

निर्मायोच्चावचं श्रुतीश्च निर्मिमीते पितृवत् ॥ ८९ ॥

उच्चावचानि भूतानि धर्माधर्मानुसारतः ।
निर्माय निर्मिमीतेऽसौ वेदांस्तद्धितकाम्यया ॥
यथा पितोत्पाद्य पुत्रानज्ञातौ ज्ञापयत्यपि ।
हिताहितपरीहारौ वाक्यैस्तद्वदयं प्रभुः ॥ ८९ ॥

मिश्रोपदेशान्नेति चेन्न स्वल्पत्वात् ॥ ९० ॥

अथायमीश्वरो नैव हितः पितृसमो यतः ।
पापसाधनहिंसाभिर्मिश्रयागोपदेशनात् ॥
इति चेन्न प्रधानांशफलसौख्याद्यपेक्षया ।
अङ्गहिंसाफलाल्पत्वान्नाहितत्वद्विधानकृत् ॥
ननु कृत्वङ्गहिंसायाः प्रधानैकफलत्वतः ।
न सामान्यनिषेधस्य विषयत्वं प्रसज्यते ॥
कुर्यान्न कुर्यादित्येवं विकल्पस्त्वन्यथा भवेत् ।
तस्माद्विशेषादन्यत्र स्याद्यदाहवनीयवत् ॥
अत्रोच्यतेऽङ्गहिंसायाः स्यादपूर्वस्य हेतुता ।
पापहेतुश्च सामान्यहिंसेत्येवाऽविरोधिता ॥
अथ प्रबलदुःखस्याननुबन्धीष्टहेतुता ।
विध्यर्थोऽयं नञायुक्तस्तदभावस्य बोधकः ॥
तथा च सर्वान्मा हिंस्यादस्य दुःखाद्यहेतुता ।
सत्यं यागाङ्गहिंसातो यद्दुःखं प्रबलं न तत् ॥
प्रधानफलसौख्यादेर्नैयत्यान्नान्तरीयकम् ।



अन्यथातिप्रसङ्गः स्यात् प्रबलत्वानिरुक्तितः॥
तस्माज्जातिविशेषोऽयं दुःखेषु प्रबलत्वता।
प्रायश्चित्तादिमरणे प्रयागमरणेऽपि वा॥
आत्महत्याकृतं दुःखं तत्फलापेक्षया लघु।
अतः प्रत्यवमर्शं हि प्राह पञ्चशिखोऽपि तत्॥
स्वल्पत्वान्न बलीयस्त्वायत्र दुःखस्य गौरवम्।
पर्यग्निकरणोत्सर्गास्तत्र श्रुत्यैव दर्शिताः॥

[मनु सं०। अ० ३। श्लो० ६८]

पञ्चसूना गृहस्थानामिति स्मृतिषु चोदितम्।
न सामान्यविशेषोक्तिर्न शून्ये सुतरां यथा॥

[विष्णुपु०। अं० ३। अ० ६। श्लो० १८।१९]

रङ्गोपजीवी पशुहा नरकं शरणं व्रजेत्॥ ९०॥
श्रुतिप्रसङ्गाच्छ्रौतानामपूर्वमथ चिन्त्यते।
कर्तृभोक्तृगतं तत् किमथ वा परमेश्वरे॥

फलमत उपपत्तेः॥ ९॥

[उत्तरमीमांसा०। अ० १। पा० १। सू० २]

राजादिरोषतोषाभ्यां दृष्टत्वात् कर्मणां फलम्।
अस्माद्ब्रह्मण एवाह भगवान् बादरायणः॥
तन्न कर्तृगतं पुत्रे जातेष्टिफलदर्शनात्।
अथ भोक्तृगतो भोगः कस्मिन्नित्येव चिन्त्यते॥
अन्योन्याश्रय एव स्यादुभयोः स्वव्यपेक्षणात्।
तस्माद्दृष्टतया रोषतोषाभ्यां परमेशितुः॥
हिताहितफलप्राप्तिः फलोद्देश्यगता भवेत्।
नाप्युद्देश्यगतत्वेन व्यापारान्तरकल्पनम्॥
अन्यथा राजसेवादावप्यपूर्वं प्रसज्यते।

अत एवेश्वरप्रीतिप्रदत्वं कर्मणां श्रुतम् ॥ ५ ॥

[गी०। अ० १२। श्लो० २०]

ये तु धर्मामृतमिदं यथोक्तं पर्युपासते।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः॥



रोषतोषादिसत्त्वेऽपि न संसारित्वमीशितुः।
तद्वृत्तत्वाददुःखत्वान्नित्यमुक्ततयापि च ॥ ९१ ॥

व्युत्क्रमादप्ययस्तथा दृष्टम् ॥ ९२ ॥

प्रलयो व्याप्यतत्त्वानां व्यापकेषूक्रमान्मतः।
व्यापिकायां मृदिव्याप्यघटादिलयदर्शनात् ॥ ९२ ॥

इत्याचार्यश्रीस्वप्नेश्वरविद्वद्वरविरचिते शाण्डिल्यशतसूत्रीये भाष्ये तृतीयाध्यायस्य प्रथममाह्निकम् ॥ १ ॥

जीवस्य ब्रह्मभावो हि मुक्तिरित्यभिधीयते।
तद्विवेकतयात्रापि भजनीयविवेचनम् ॥
अन्यस्य कथमन्यत्वं घटेतेति वितर्कयन्।
जीवानां भगवद्भावे योग्यतामाह सूत्रकृत् ॥

तदैक्यंनानात्वैकत्वमुपाधियोगहानादादित्यवत्॥९३॥

(छांन्दो०) सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन (गी० अ० १३। श्लो० ३३।३४)।

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥
क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत।

इत्यादिभिस्तस्यैकत्वमेव स्वभावः। उभयथा चात्मप्रत्ययः स जीवोपाधिबुद्धिरात्मानुकृतः। तथा च श्रुतिः 'एकधा बहुधा चैव दृश्यते जलचन्द्रवत्'। (विष्णुपु० अं० २। अ० १६। श्लो० १२)।

सितनीलादिभेदेन यथैकं दृश्यते नभः।
भ्रान्तदृष्टिभिरात्मापि तथैकः सन् पृथक् पृथक्॥

इति। ततः परभक्त्या जीवोपाधिबुद्धिहाने सति पुनरेकत्वमप्यविरुद्धं यथादित्यस्य प्रकाशात्मनः प्रतिविम्बोपाधिदर्पणाद्यपगमे तद्वत्॥ ९३॥

पृथगिति चेन्न परेणासम्बन्धात् प्रकाशानाम्॥९४॥

पृथगेव परस्परमत्यन्तभिन्नाः प्रकाशात्मान एव जीवाः अन्यथा श्वेन्मुक्तः कश्चिद्बद्ध इति व्यवस्था न स्यादिति चेन्न कथंचिदनीश्वरसांख्यानां तथा संभवेऽपि सेश्वरसांख्यानां तदसम्भवात्। कथम्। प्रकाशात्मनां परेण परमेश्वरेण सह द्रष्टृत्वदृश्यत्वलक्षणसम्बन्धाभावात् तेषां स्वप्रकाशतयादित्येनैव प्रदीपानामप्रकाशनात्। तथानीश्वरत्वमसर्वज्ञत्वं ज्ञेयत्वं च ब्रह्मणः स्यात्। अथ प्रकाश्यास्तेषां ताद्यप्रसङ्गान्नापि मिथोबुद्धिवृत्त्या प्रकाश्यत्वम्। तद्धि तमोऽभिभूयैव नेवान्तःकरणसत्त्ववृत्त्या। नच तदयोग्यत्वे तत् सम्भवति। न ह्यल्पावरणनिवृत्तावपि दीपो दीपान्तरप्रकाश्य इति बाह्याभ्यन्तरप्रकाशयोः कश्चिदौपाधिकोऽप्येकधर्मो येन [बृहदा०] 'स्वयं ज्योतिरेवायं पुरुष' इत्यादौ गौणो ज्योतिःशब्दः। तस्माच्चिदात्मा जगत्प्रकाशकत्वेनैव सिध्यतीति न तत्र परापेक्षा। किञ्च मनोधर्मभ्रमतत्त्वधियोरधिष्ठानतया चात्मसिद्धिरप्रत्यूहैव बुद्धिवृत्तीनां तु गौण एव ज्ञानत्वसुखत्वव्यवहारः।

किं मानमात्मनां भेदे बुद्धितत्त्वभिदा स्थिता।
बन्धमोक्षव्यवस्थाने नित्यमुक्तात्मनां कुतः॥ १॥ इति॥ ९४॥

अथ विकारिण एव सत्तात्मानो ज्ञानेच्छादयस्तद्गुणाः जानामीच्छामि सुखीत्यादिप्रत्ययादिति मतं निरस्यन्नाह।

न विकारिणस्तु कारणविकारात्॥ ९५॥

न ज्ञानादिविकारवन्त आत्मानो भवितुमर्हन्ति कुतः सुखोपल-
देः करणगतत्वेन ज्ञानादीनामुपपत्तेरात्मनामविकारित्वात्। तथा
सुखोपलब्धिः सकरणिकेत्याद्यनुमाने तादृशकरणसम्बन्धस्य तादा-
त्म्य सत्त्वात् सुखादयो नात्मविकारा आत्मनि प्रतीतत्वाद्गौरत्वादि-
त्यनुमानाच्च। एवमहन्त्वस्यापि कारणतादात्म्येनैव मनसा ग्रहण-
सुषुप्तौ मनोलये तदग्रहणम्। कालोपाधीनां कालत्ववदिति दि-
९५॥

अथ कथं जीवस्य ब्रह्मभाव इत्यपेक्षायामाह।

अनन्यभक्त्या तद्बुद्धिर्बुद्धिलयादत्यन्तम्॥ ९६।

गी०। अ० ८। श्लो० २२)

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम्॥

ति श्रुतम्। तथा [नृसिंहपु०।] भक्त्यैकलभ्ये पुरुषे पुराणे
किमर्थं क्रियते न यत्न इति। तस्मात् परभक्तिमात्रेण बुद्धेरत्य-
सति ब्रह्मानन्दावाप्तिलक्षणा मुक्तिरित्यर्थः। तथा च तदीयबु-
लयप्रागभावसहवृत्तिब्रह्मानन्दावाप्तिर्मुक्तिरिति तल्लक्षणं सूचित-
अथ ब्रह्मानन्दावाप्तेः सिद्धत्वेनापुरुषार्थत्वमिति चेन्न ग्रामादिव-
ष्टतया पुमर्थत्वात्। अत्र बुद्धिर्जीवोपाधिर्मता भगवत एव बु-
त्वाभ्युपगमात्। अन्यथा इदं सुखमत्र सुखत्वमिति ज्ञानाज्जाते-
तया तद्विशिष्टस्य पुमर्थाभावप्रसङ्गात् ईहाकृत्योर्विकल्पकत्वा-
त्। तस्मादसिद्धोपरागेण सिद्धे अपीच्छाकृती इति। कृत्यसा-
ज्ञानं प्रतिबन्धकमिति चेत् [illegible] बलवदनिष्टानुबन्धित्वतिरो-
दिवोत्कटरागेण [illegible]

LIBRARY